[२४४] हृष = तुष्टौ । अक० । सेट् । पर० । to be delighted; to stand erect (as hair). हृष्यति इत्यादि । कुस (२३५) धातुवत् । 1. लट् । हृष्यति ॥ 5. लिट् । प्र० जहर्ष । जहृषतुः । जहृषुः ॥ म० जहर्षिथ । जहृषथुः । जहृष ॥ उ० जहर्ष । जहृषिव । जहृषिम ॥ 6. लुट् । हर्षिता ॥ 7. लृट् । हर्षिष्यति ॥ 8. आशी० । हृष्यात् । हृष्यास्ताम् ॥ 9. लुङ् । II. अहृषत् ॥ 10. लृङ् । अर्षिष्यत् ॥

[२४५] दृप् = हर्षमोहनयोः । मोहनं गर्वः । अक० । वेट् । पर० । to be glad; to be proud.

1. लट्। दृप्यति। 2. लोट्। दृप्यतु॥ 3. लङ्। अदृप्यत्॥ 4. विधि०। दृप्येत्॥

5. लिट्। प्र० ददर्प। ददृपतुः। ददृपुः॥ म० ददर्पिथ--ददर्प्थ--दद्रप्थ। ददृपथुः॥ ददृप॥ उ० ददर्प। ददृपिव--ददृप्व। ददृपिम--ददृप्म॥ 6. लुट्। दर्पिता--दर्प्ता--द्रप्ता॥ 7. लृट्। दर्पिष्यति--दर्प्स्यति--द्रप्स्यति। 8. आशी०। दृप्यात्। दृप्यास्ताम्॥ 9. लुङ्। VI. प्र० अद्राप्सीत्। अद्राप्ताम्। अद्राप्सुः॥ पक्षे—अदार्प्सीत्। अदार्प्ताम्। अदार्प्सुः॥ अथवा—II. अदृपत्। अदृपताम्। अदृपन्॥ किं वा--अदर्पीत्। अदर्पिष्टाम्। अदर्पिषुः॥ 10. लृङ्। अदर्पिष्यत्--अद्रप्स्यत्--अदर्प्स्यत्॥

[२४६] तृप = प्रीणने। अक०—सक०। वेट्। पर०। to become satisfied. तृप्यति इत्यादि। दृप (२४५) धातुवत्॥

[२४७] द्रुह = जिघांसायाम्। सक०। वेट्। पर०। to seek to hurt; to bear hatred.

1. लट्। द्रुह्यति। 2. लोट्। द्रुह्यतु॥ 3. लङ्। अद्रुह्यत्॥ 4. विधि०। द्रुह्येत्॥

5. लिट्। प्र० दुद्रोह। दुद्रुहतुः। दुद्रुहुः॥

म० दुद्रोहिथ--दुद्रोग्ध--दुद्रोढ । दुद्रुहथुः । दुद्रुह ॥ उ० दुद्रोह । दुद्रुहिव--दुद्रुह्व । दुद्रुहिम--दुद्रुह्म ॥ 6. लुट् । द्रोहिता--द्रोग्धा--द्रोढा ॥ 7. लृट् । द्रोहिष्यति--ध्रोक्ष्यति ॥ 8. आशी० । द्रुह्यात् । द्रुह्यास्ताम् । द्रुह्यासुः ॥ 9. लुङ् । II. अद्रुहत् ॥ 10. लृङ् । अद्रोहिष्यत्--अध्रोक्ष्यत् ॥

[२४८] मुह = वैचित्ये । अक० । वेट् । पर० । to loose sense; to faint; to err; to be foolish. मुह्यति इत्यादि । द्रुह (२४७) धातुवत् ॥

5. लिट् । प्र० मुमोह । मुमुहतुः । मुमुहुः ॥ म० मुमोहिथ--मुमोग्ध--मुमोढ । मुमुहथुः । मुमुह ॥ उ० मुमोह । मुमुहिव--मुमुह्व । मुमुहिम--मुमुह्म ॥ 6. लुट् । मोहिता--मोग्धा--मोढा ॥ 7. लृट् । मोहिष्यति--मोक्ष्यति ॥ 8. आशी० । मुह्यात् । मुह्यास्ताम् । मुह्यासुः ॥ 9. लुङ् । II. अमुहत् ॥ 10. लृङ् । अमोहिष्यत्--अमोक्ष्यत् ॥

[२४९] असु (अस्) = क्षेपणे । सक० । सेट् । पर० । to throw; अस्यति इत्यादि ॥

5. लिट् । प्र० आस । आसतुः । आसुः ॥ म० आसिथ । आसथुः । आस ॥ उ० आस । आसिव । आसिम ॥ 6. लुट् । असिता ॥ 7. लृट् । असिष्यति ॥

8. आशी० । अस्यात् । अस्यास्ताम् ॥ 9. लुङ् II. प्र० आस्थत् । आस्थताम् । आस्थन् ॥ म० आस्थः । आस्थतम् । आस्थत ॥ उ० आस्थम् । आस्थाव । आस्थाम ॥ 10. लृङ् । आसिष्यत् ॥

[२५०] ञि तृषा (तृष्) = पिपासायाम् । अक० । सेट् । पर० । to be thirsty; to wish. 1. लट् । तृष्यति । 2. लोट् । तृष्यतु ॥ 3. लङ् । अतृष्यत् । इत्यादि । कुस (२३५) धातुवत् ॥

5. लिट् । प्र० ततर्ष । ततृषतुः । ततृषुः ॥ म० ततर्षिथ । ततृषथुः । ततृष ॥ उ० ततर्ष । ततृषिव । ततृषिम ॥

[२५१] शमु (शम्) = उपशमे । अक० । सेट् । पर० । to calm ; to stop.

1. लट् । शाम्यति ॥ 2. लोट् । शाम्यतु ॥ 3. लङ् । अशाम्यत् ॥ 4. विधि० । शाम्येत् ॥

5. लिट् । प्र० शशाम । शेमतुः । शेमुः ॥ म० शेमिथ । शेमथुः । शेम ॥ उ० शशाम--शशम । शेमिव । शेमिम ॥ 6. लुट् । शमिता ॥ 7. लृट् । शमिष्यति ॥ 8. आशी० । शम्यात् । शम्यास्ताम् । 9. लुङ् । II. अशमत् ॥ 10. लृङ् । अशमिष्यत् ॥

[२५२] तमु (तम्) = काङ्क्षायाम् खेदे च । अक० । सेट् ।

पर० । to be anxious ; to be fatigued. ताम्यति इत्यादि **शमु** (२५१) धातुवत् ॥

[२५३] श्रमु = तपसि खेदे च । अक० । सेट् । पर० । to take pains; to mortify; to be fatigued. श्राम्यति इत्यादि **शमु** (२५१) धातुवत् ॥

5. **लिट्** । **प्र०** शश्राम । शश्रमतुः । शश्रमुः ॥ **म०** शश्रमिथ । शश्रमथुः । शश्रम ॥ **उ०** शश्राम--शश्रम । शश्रमिव । शश्रमिम ॥

[२५४] **क्षमू** (क्षम्) = सहने । सक० । वेट् । पर० । to suffer ; to forgive ; to endure. **शमु** (२५१) धातुवत् । 1. **लट्** । क्षाम्यति ॥ 2. **लोट्** । क्षाम्यतु ॥

5. **लिट्** । **प्र०** चक्षाम । चक्षमतुः । चक्षमुः ॥ **म०** चक्षमिथ--चक्षन्थ । चक्षमथुः । चक्षम ॥ **उ०** चक्षाम--चक्षम । चक्षमिव--चक्षण्व । चक्षमिम--चक्षण्म ॥ 6. **लुट्** । क्षमिता--क्षन्ता ॥ 7. **लृट्** । क्षमिष्यति--क्षंस्यति ॥ 8. **आशी०** । क्षम्यात् । क्षम्यास्ताम् ॥ 9. **लुङ्** । II. अक्षमत् ॥ 10. **लृङ्** । अक्षमिष्यत्--अक्षंस्यत् ॥

[२५५] **भ्रमु** (भ्रम्) = अनवस्थाने । अक० । सेट् । पर० । to roam about. भ्राम्यति इत्यादि **शमु** (२५१) धातुवत् ॥

5. लिट् । बभ्राम । भ्रेमतुः--बभ्रमतुः । इत्यादि ॥ सार्वधातुकलकारेषु भ्रमतीत्याद्यपि **गद** (२२) धातुवत् रूपम् ॥

[२५६] **क्लमु** = ग्लानौ । अक० । सेट् । पर० । to be fatigued. क्लाम्यति इत्यादि **शमु** (२५१) धातुवत् ॥

5. **लिट्** । **प्र०** चक्लाम । चक्लमतुः । चक्लमुः ॥ **म०** चक्लमिथ । चक्लमथुः । चक्लम । **उ०** चक्लाम--चक्लम । चक्लमिव । चक्लमिम ॥

[२५७] **मदी** (मद्) = हर्षे ग्लेपने च । अक० । सेट् । पर० । to be glad; to be intoxicated. माद्यति इत्यादि । **शमु** (२५१) धातुवत् ॥

5. **लिट्** । **प्र०** ममाद । मेदतुः । मेदुः ॥ **म०** मेदिथ । मेदथुः । मेद ॥ **उ०** ममाद--ममद । मेदिव । मेदिम ॥

[२५८] **यसु** (यस्) = प्रयत्ने । अक० । सेट् । पर० । to endeavour; to labour.

1. **लट्** । यस्यति ॥ 2. **लोट्** । यस्यतु ॥ 3. **लङ्** । अयस्यत् ॥ 4. **विधि०** । यस्येत् ॥ सार्वधातुके **गद** (२५) धातुवदप्यस्य रूपाणि । यथा--यसति ॥ यसतु ॥ अयसत् ॥ यसेत् इति ॥

5. लिट् । प्र० ययास । येसतुः । येसुः ॥ म० येसिथ । येसथुः । येस ॥ उ० ययास--ययस । येसिव । येसिम ॥ 6. लुट् । यसिता ॥ 7. लृट् । यसिष्यति ॥ 8. आशी० । यस्यात् । यस्यास्ताम् । यस्यासुः ॥ 9. लुङ् । II. प्र० अयसत् । अयसताम् । अयसन् ॥ म० अयसः । अयसतम् । अयसत ॥ उ० अयसम् । अयसाव । अयसाम ॥ 10. लृङ् । अयस्यत् ॥

[२५९] रध = हिंसासंराध्योः । सक०--अक० । वेट् । पर० । to kill; to injure; to cook; to finish.

1. लट् । रध्यति ॥ 2. लोट् । रध्यतु ॥ 3. लङ् । अरध्यत् ॥ 4. विधि० । रध्येत् ॥

5. लिट् । प्र० ररन्ध । ररन्धतुः । ररन्धुः ॥ म० ररन्धिथ--ररद्ध । ररन्धथुः । ररन्ध ॥ उ० ररन्ध । ररन्धिव--रेध्व । ररन्धिम--रेध्म ॥ 6. लुट् । रधिता--रद्धा ॥ 7. लृट् । रधिष्यति--रत्स्यति ॥ 8. आशी० । रध्यात् । रध्यास्ताम् ॥ 9. लुङ् । II. प्र० अरधत् । अरधताम् ॥ 10. लृङ् । अरधिष्यत्--अरत्स्यत् ॥

[२६०] व्यध = ताडने । सक० । अनि० । पर० । to strike; to hurt.

1. लट् । प्र० विध्यति ॥ म० विध्यसि ॥ उ० विध्यामि ॥

2. लोट् । प्र० विध्यतु--तात् ॥ म० विध्य--विध्यतात् ॥ उ० विध्यानि ॥ 3. लङ् । अविध्यत ॥ 4. विधि० । विध्येत् ॥

5. लिट् । प्र० विव्याध । विविधतुः । विविधुः ॥ म० विव्यधिथ--विव्यद्ध । विविधथुः । विविध ॥ उ० विव्याध--विव्यध । विविधिव । विविधिम ॥ 6. लुट् । व्यद्धा ॥ 7. लृट् । व्यत्स्यति ॥ 8. आशी० । विध्यात् । विध्यास्ताम् ॥ 9. लुङ् । VI. प्र०अव्यात्सीत् । अव्याद्धाम् । अव्यात्सुः ॥ म० अव्यात्सीः । अव्याद्धम् । अव्याद्ध ॥ उ० अव्यात्सम् । अव्यात्स्व । अव्यात्स्म ॥ 10. लृङ् । अव्यत्स्यत् ॥

[२६१] श्लिष = आलिङ्गने ॥ सक० । अनि० । पर० । to embrace; to unite.

1. लट् । श्लिष्यति ॥ 2. लोट् । श्लिष्यतु ॥ 3. लङ् । अश्लिष्यत् ॥ 4. विधि० । श्लिष्येत् ॥

5. लिट् । प्र० शिश्लेष । शिश्लिषतुः । शिश्लिषुः ॥ म० शिश्लेषिथ । शिश्लिषथुः । शिश्लिष ॥ उ० शिश्लेष । शिश्लिषिव । शिश्लिषिम ॥ 6. लुट् । श्लेष्टा ॥ 7. लृट् । श्लेक्ष्यति ॥ 8. आशी० । श्लिष्यात् । श्लिष्यास्ताम् ॥ 9. लुङ् । II. अश्लिषत् ॥ 10. लृङ् । अश्लेक्ष्यत् ॥

[२६२] ष्णिह (स्निह्) = प्रीतौ । अक० । वेट् । पर० ।
to love ; to feel affection for ; to be kind to.

1. लट् । स्निह्यति । 2. लोट् । स्निह्यतु ॥ 3. लङ् । अस्निह्यत् ॥ 4. विधि० । स्निह्येत् ॥

5. लिट् । प्र० सिष्णेह । सिष्णिहतुः । सिष्णिहुः ॥ म० सिष्णेहिथ–सिष्णेग्ध–सिष्णेढ । सिष्णिहथुः । सिष्णिह ॥ उ० सिष्णेह । सिष्णिहिव–सिष्णिह्व । सिष्णिहिम--सिष्णिह्म ॥ 6. लुट् । स्नेहिता--स्नेग्धा--स्नेढा ॥ 7. लृट् । स्नेहिष्यति--स्नेक्ष्यति ॥ 8. आशी० । स्निह्यात् । स्निह्यास्ताम् ॥ 9. लुङ् । II. अस्निहत् ॥ 10. लृङ् । अस्नेहिष्यत् । अस्नेक्ष्यत् ॥

[२६३] ऋधु = वृद्धौ । अक० । सेट् । पर० । 1. लट् । ऋध्यति ॥ 2. लोट् । ऋध्यतु ॥ 3. लङ् । आर्ध्यत् ॥ 4. विधि० । ऋध्येत् ॥ 5. लिट् । प्र० आनर्ध । आनृधतुः । आनृधुः ॥ म० आनर्धिथ । आनृधथुः । आनृध ॥ उ० आनर्ध । आनृधिव । आनृधिम ॥ 6. लुट् । अर्धिता ॥ 7. लृट् । अर्धिष्यति ॥ 8. आशी० । ऋध्यात् । ऋध्यास्ताम् ॥ 9. लुङ् । II. आर्धत् । आर्धताम् । आर्धन् ॥ 10. लृङ् । आर्धिष्यत् ॥

[२६४] दो = अवखण्डने। सक०। अनि०। पर०। to cut; to divide.

1. लट्। द्यति॥ 2. लोट्। द्यतु॥ 3. लङ्। अद्यत्॥ 4. विधि०। द्येत्। द्येताम्। द्येयुः॥

5. लिट्। प्र० ददौ। ददतुः। ददुः॥ म० ददिथ–ददाथ। ददथुः। दद॥ उ० ददौ। ददिव। ददिम॥ 6. लुट्। दाता॥ 7. लृट्। दास्यति॥ 8. आशी०। देयात्। देयास्ताम्॥ 9. लुङ्। I. अदात्। अदाताम्। अदुः॥10. लृङ्। अदास्यत्॥

[२६५] षो = अन्तकर्मणि। सक०। अनि०। पर०। to destroy; to bring to an ned. दो (२६४) धातुवत्॥

1. लट्। स्यति॥

5. लिट्। ससौ॥ 6. लुट्। साता॥ 7. लृट्। सास्यति॥ 8. आशी०। सायात्। सायास्ताम्॥ 9. लुङ्। I. असात्। असाताम्। असुः॥ पक्षे— IV. असासीत्। असासिष्टाम्। असासिषुः॥

[२६६] नृती (नृत्) = गात्रविक्षेपे। अक०। सेट्। पर०। to dance.

1. लट्। नृत्यति॥ 2. लोट्। नृत्यतु॥ 3. लङ्। अनृत्यत्॥ 4. विधि०। नृत्येत्॥

5. **लिट्** । **प्र०** ननर्त । ननृततुः । ननृतुः ॥ **म०** ननर्तिथ । ननृतथुः । ननृत ॥ **उ०** ननर्त । ननृतिव । ननृतिम ॥ 6. **लुट्** । नर्तिता ॥ 7. **लृट्** । नर्तिष्यति ॥ 8. **आशी०** । नृत्यात् । नृत्यास्ताम् ॥ 9. **लुङ्** । VII. अनर्तीत् । अनर्तिष्टाम् ॥

[२६७] तप = ऐश्वर्ये । अक० । अनि० । आत्म० । to rule; to be powerful.

1. **लट्** । तप्यते ॥ 2. **लोट्** । तप्यताम् ॥ 3. अतप्यत ॥ 4. **विधि०** । तप्येत ॥

5. **लिट्** । **प्र०** तेपे । तेपाते । तेपिरे ॥ **म०** तेपिषे । तेपाथे । तेपिध्वे ॥ **उ०** तेपे । तेपिवहे । तेपिमहे ॥ 6. **लुट्** । तप्ता ॥ तप्तासे ॥ 7. **लृट्** । तप्स्यते ॥ 8. **आशी०** । तप्सीष्ट ॥ 9. **लुङ्** । X. **प्र०** अतप्त । अतप्साताम् । अतप्सत ॥ **म०** अतप्थाः । अतप्साथाम् । अतब्ध्वम् ॥ **उ०** अतप्सि । अतप्स्वहि । अतप्स्महि ॥ 10. **लृङ्** । अतप्स्यत ॥

[२६८] पद = गतौ । सक० । अनि० । आत्म० । to go; to attain. पद्यते । **तप** (२६७) धातुवत् ॥ 6. **लुट्** । पत्ता ॥ 7. **लृट्** । पत्स्यते ॥ 9. **लुङ्** । X. **प्र०** अपादि । अपत्साताम् । अपत्सत ॥ **म०** अपत्थाः ।

अपत्साथाम् । अपद्ध्वम् ॥ उ० अपत्सि । अपत्स्वहि । अपत्स्महि ॥ 10. लृङ् । अपत्स्यत ॥

[२६९] **मन** = ज्ञाने । सक० । अनि० । आत्म० । to know; to think. मन्यते । **तप** (२६७) धातुवत् ॥ 6. लुट् । मन्ता ॥ 7. लृट् । मंस्यते ॥ 9. लुङ् । X. अमंस्त ॥

[२७०] **अण** = प्राणने । अक० । सेट् । आत्म० । to breathe; to live. अण्यते इत्यादि ॥

5. **लिट्** । **प्र**० आणे । आणाते । आणिरे ॥ **म**० आणिषे । आणाथे । आणिध्वे ॥ उ० आणे । आणिवहे । आणिमहे ॥ 9. लुङ् । X. आणिष्ट । आणिषाताम् ॥

[२७१] **विद** = सत्तायाम् । अक० । अनि० । आत्म० । to be; to happen. विद्यते इत्यादि ॥

5. **लिट्** । **प्र**० विविदे । विविदाते । विविदिरे ॥ **म**० विविदिषे । विविदाथे । विविदिध्वे ॥ उ० विविदे । विविदिवहे । विविदिमहे ॥ 6. लुट् । वेत्ता ॥ 7. लृट् । वेत्स्यते ॥ 8. **आशी**० । वित्सीष्ट ॥ 9. लुङ् । X. **प्र**० अवित्त । अवित्साताम् । अवित्सत ॥ **म**० अवित्थाः । अवित्साथाम् । अविद्ध्वम् ॥ उ० अवित्सि । अवित्स्वहि । अवित्स्महि ॥ 10. लृङ् । अवेत्स्यत ॥

[२७२] लीङ् (ली) = श्लेषणे । अक० । अनि० । आत्म० । to stick ; to lie on. लीयते इत्यादि ॥ 5. लिट् । लिल्ये । लिल्याते ॥ 6. लुट् । लेता–लाता ॥ 7. लृट् । लेष्यते–लास्यते ॥ 8. आशी० । लेषीष्ट–लासीष्ट ॥ म० लेषीढ्वम् । 9. लुङ् । X. प्र० अलेष्ट--अलास्त ॥ म० अलेढ्वम् ।

[२७३] दीपी (दीप्) = दीप्तौ । अक० । सेट् । आत्म० । to shine ; to burn. दीप्यते इत्यादि ॥

5. लिट् । दिदीपे । 6. लुट् । दीपिता ॥ 7. लृट् । दीपिष्यते ॥ 8. आशी० । दीपिषीष्ट ॥ 9. लुङ् । X. प्र० अदीपि--अदीपिष्ट । अदीपिषाताम् । अदीपिषत ॥ म० अदीपिष्ठाः । अदीपिषाथाम् । अदीपिध्वम् ॥ उ० आदीपिषि । अदीपिष्वहि । अदीपिष्महि ॥

[२७४] जनी = प्रादुर्भावे । अक० । सेट् । आत्म० । to be born.

1. लट् । जायते ॥ 2. लोट् । जायताम् ॥ 3. लङ् । अजायत ॥ 4. विधि० । जायेत ॥

5. लिट् । प्र० जज्ञे । जज्ञाते । जज्ञिरे ॥ म० जज्ञिषे । जज्ञाथे । जज्ञिध्वे ॥ उ० जज्ञे । जज्ञिवहे । जज्ञिमहे ॥ 6. लुट् । जनिता ॥ 7. लृट् । जनिष्यते । 8. आशी० । जनिषीष्ट ॥ 9. लुङ् । X. अजनि–

अजनिष्ट । अजनिषाताम् । अजनिषत ॥ 10. लृङ् । अजनिष्यत ॥

[२७५] षूङ् (सू) = प्राणिप्रसवे । सक० । वेट् । आत्म० । to bring forth a child.

1. लट् । सूयते ॥ 2. लोट् । सूयताम् ॥ 3. लङ् । असूयत ॥ 4. विधि० । सूयेत ॥

5. लिट् । प्र० सुषुवे । सुषुवाते । सुषुविरे ॥ म० सुषुविषे । सुषुवाथे । सुषुविढ्वे--ध्वे ॥ उ० सुषुवे । सुषुविवहे । सुषुविमहे ॥ 6. लुट् । सोता--सविता ॥ 7. लृट् । सोष्यते--सविष्यते ॥ 8. प्र० आशी० । सोषीष्ट--सविषीष्ट ॥ म० सोषीढ्वम्--सविषीढ्वम्--ध्वम् ॥ 9. लुङ् । X. XI. प्र० असविष्ट--असोष्ट ॥ म० असविध्वम्--ढ्वम्--असोढ्वम् ॥ 10. लृङ् । असोष्यत--असविष्यत ॥

[२७६] बुध = अवगमे । सक० । अनि० । आत्म० । to know; to understand. बुध्यते इत्यादि । 5. लिट् । बुबुधे ॥ 6. लुट् । बोद्धा ॥ 7. लृट् । भोत्स्यते ॥ 8. आशी० । भुत्सीष्ट ॥ 9. लुङ् । X. प्र० अबोधि--अबुद्ध । अभुत्साताम् । अभुत्सत ॥ म० अबुद्धाः । अभुत्साताम् । अभुद्ध्वम् ॥ उ० अभुत्सि । अभुत्स्वहि । अभुत्स्महि ॥ 10. लृङ् । अभोत्स्यत ॥

[२७७] युध = संप्रहारे । अक० । अनि० । आत्म० । to fight. युध्यते इत्यादि बुध (२७६) धातुवत् ॥

[२७८] रुधधातुरनुपूर्वः = कामे । सक० । अनि० । आत्म० । to desire ; to obey. बुध (२७६) धातुवत् ॥ अनुरुध्यते ॥ अनुरुरुधे ॥

[२७९] युज = समाधौ । अक० । अनि० । आत्म० । to concentrate the mind. बुध (२७६) धातुवत् ॥ 8. आशी० । युक्षीष्ट ॥ 9. लुङ् । XII. अयुक्त । अयुक्षाताम् ॥

[२८०] णह (नह्) = बन्धने । सक० । अनि० । उभ० । to lie ; to bind. परस्मैपदे—1. लट् । नह्यति ॥ 2. लोट् । नह्यतु । 3. लङ् । अनह्यत् ॥ 4. विधि० । नह्येत् ॥ 5. लिट् । ननाह । नेहतुः । नेहुः ॥ 6. लुट् । नद्धा ॥ 7. लृट् । नत्स्यति ॥ 8. आशी० । नह्यात् । नह्यास्ताम् ॥ 9. लुङ् । VI. अनात्सीत् । अनाद्धाम् ॥ 10. लृङ् । अनत्स्यत् ॥

आत्मनेपदे—तप (२६७) धातुवत् ॥ 5. लिट् । नेहे । नेहाते । नेहिरे ॥ 9. लुङ् । अनद्ध ॥

इति दिवादयः ॥ ४ ॥

पार्वतीपरमेश्वराभ्यां नमः ।

अथ मध्यमधातुरूपावल्याम् ।

स्वादयः ॥ ५ ॥

तत्र परस्मैपदिनः ।

[२८१] शक्लृ (शक्)=शक्तौ । अक० । अनि० । पर० । to be able ; to be powerful ; to endure.

1. लट् । प्र० शक्नोति । शक्नुतः । शक्नुवन्ति ॥ म० शक्नोषि । शक्नुथः । शक्नुथ ॥ उ० शक्नोमि । शक्नुवः ॥ शक्नुमः ॥

2. लोट् । प्र० शक्नोतु--शक्नुतात् । शक्नुताम् । शक्नुवन्तु ॥ म० शक्नुहि--शक्नुतात् । शक्नुतम् । शक्नुत ॥ उ० शक्नवानि । शक्नवाव । शक्नवाम ॥

3. लङ् । प्र० अशक्नोत् । अशक्नुताम् । अशक्नुवन् ॥ म० अशक्नोः । अशक्नुतम् । अशक्नुत ॥ उ० अशक्नवम् । अशक्नुव । अशक्नुम ॥

4. **विधि०** । प्र० शक्नुयात् । शक्नुयाताम् । शक्नुयुः ॥ म० शक्नुयाः । शक्नुयातम् । शक्नुयात ॥ उ० शक्नुयाम् । शक्नुयाव । शक्नुयाम ॥

5. **लिट्** । प्र० शशाक । शेकतुः । शेकुः ॥ म० शेकिथ–शशक्थ । शेकथुः । शेक ॥ उ० शशाक--शशक । शेकिव । शेकिम ॥ 6. **लुट्** । प्र० शक्ता । शक्तारौ । शक्तारः ॥ म० शक्तासि । शक्तास्थः । शक्तास्थ ॥ उ० शक्तास्मि । शक्तास्वः । शक्तास्मः ॥ 7. **लृट्** । प्र० शक्ष्यति । शक्ष्यतः । शक्ष्यन्ति ॥ म० शक्ष्यसि । शक्ष्यथः । शक्ष्यथ ॥ उ० शक्ष्यामि । शक्ष्यावः । शक्ष्यामः ॥

8. **आशी०** । प्र० शक्यात् । शक्यास्ताम् । शक्यासुः ॥ म० शक्याः । शक्यास्तम् । शक्यास्त ॥ उ० शक्यासम् । शक्यास्व । शक्यास्म ॥

9. **लुङ् II.** प्र० अशकत् । अशकताम् । अशकन् ॥ म० अशकः । अशकतम् । अशकत ॥ उ० अशकम् । अशकाव । अशकाम ॥

10. **लृङ्** । प्र० अशक्ष्यत् । अशक्ष्यताम् । अशक्ष्यन् ॥ म० अशक्ष्यः । अशक्ष्यतम् । अशक्ष्यत ॥ उ० अशक्ष्यम् । अशक्ष्याव । अशक्ष्याम ॥

[२८२] आपॢ (आप्) = व्याप्तौ । सक० । अनि० । पर० । to obtain ; to pervade.

1. लट् । प्र० आप्नोति ॥ म० आप्नोषि ॥ उ० आप्नोमि ॥ 2. लोट् । प्र० आप्नोतु ॥ म० आप्नुहि ॥ उ० आप्नवानि ॥ 3. लङ् । प्र० आप्नोत् ॥ म० आप्नोः ॥ उ० आप्नवम् । आप्नुव । आप्नुम ॥ 4. विधि० । आप्नुयात् । आप्नुयाताम् ॥

5. लिट् । प्र० आप । आपतुः । आपुः ॥ म० आपिथ । आपथुः । आप ॥ उ० आप । आपिव । आपिम ॥ 6. लुट् । प्र० आप्ता ॥ म० आप्तासि । उ० आप्तास्मि ॥ 7. लृट् । आप्स्यति ॥ 8. आशी० । आप्यात् । आप्यास्ताम् ॥ 9. लुङ् । II. आपत् । आपताम् । आपन् ॥ 10. लृङ् । आप्स्यत् ॥

[२८३] टुदु दु (दु) = उपतापे । सक० । अनि० । पर० । to give pain to ; to distress ; to burn. 1. लट् । ति ॥ 2. लोट् । दुनोतु ॥ 3. लङ् । अदुनोत् ॥ 4. विधि० । दुनुयात् ॥

5. लिट् । प्र० दुदाव । दुदुवतुः । दुदुवुः ॥ म० दुदविथ--दुदोथ । दुदुवथुः । दुदुव ॥ उ० दुदाव--दुदव । दुदुविव । दुदुविम ॥ 6. लुट् । दोता ॥ 7. लृट् । दोष्यति ।

8. **आशी०** । दूयात् । दूयास्ताम् ॥ 9. **लुङ्** । VI. अदौषीत् । अदौष्टाम् । अदौषुः ॥ 10. **लृङ्** । अदोष्यत् ॥

[२८४] **ञि धृषा** (धृष्) = प्रागल्भ्ये । अक० । सेट्० । पर० । to be brave; to be bold; to be proud; to be confident.

1. **लट्** । **प्र०** धृष्णोति । धृष्णुतः । धृष्णुवन्ति ॥ 2. **लोट्** । **प्र०** धृष्णोतु ॥ **म०** धृष्णुहि ॥ **उ०** धृष्णवानि ॥ 3. **लङ्** । **प्र०** अधृष्णोत् । अधृष्णुताम् । अधृष्णुवन् ॥ **म०** अधृष्णोः । अधृष्णुतम् । अधृष्णुत ॥ **उ०** अधृष्णवम् । अधृष्णुव । अधृष्णुम ॥ 4. **विधि०** । धृष्णुयात् ॥

5. **लिट्** । **प्र०** दधर्ष । दधृषतुः । दधृषुः ॥ **म०** दधर्षिथ । दधृषथुः । दधृष ॥ **उ०** दधर्ष । दधृषिव । दधृषिम ॥ 6. **लुट्** । धर्षिता ॥ 7. **लृट्** । धर्षिष्यति ॥ 8. **आशी०** । धृष्यात् । धृष्यास्ताम् ॥ 9. **लुङ्** । VII. अधर्षीत् । अधर्षिष्टाम् । अधर्षिषुः ॥ 10. **लृङ्** । अधर्षिष्यत् ॥

[२८५] **राध** = संसिद्धौ हिंसायां च । अक० । अनि० । पर० ॥ to accomplish; to kill. राध्नोति इत्यादि । **शक्लृ** (२८१) धातुवत् ॥ 5. **लिट्** । **प्र०** रराध । रराधतुः । रराधुः ॥ **म०** रराधिथ । रराधथुः । रराध ॥ **उ०** रराध । रराधिव । रराधिम ॥ **हिंसार्थे तु, प्र०** रराध । रेधतुः ।

रेधुः । म० रेधिथ । रेधथुः । रेध ॥ उ० रराध । रेधिव । रेधिम ॥ 6. लुट् । राद्धा ॥ 7. लृट् । रात्स्यति ॥ 8. आशी० । राध्यात् । राध्यास्ताम् ॥ 9. लुङ् । VI. अरात्सीत् । अराद्धाम् । अरात्सुः ॥ 10. लृङ् । अरात्स्यत् ॥

[२८६] **साध** = संसिद्धौ । अक० । अनि० । पर० । to accomplish. **राध** (२८५) धातुवत् ।

1. **लट्** । साध्नोति ॥ 5. **लिट्** । **प्र०**ससाध । ससाधतुः । ससाधुः ॥ **म०** ससाधिथ । ससाधथुः । ससाध ॥

[२८७] **हि** = गतौ वृद्धौ च । अक० । अनि० । पर० । to go; to send; to shoot.

1. **लट्** । **प्र०** हिनोति । हिनुतः । हिन्वन्ति ॥ **म०** हिनोषि । हिनुथः । हिनुथ ॥ उ० हिनोमि । हिनुवः–हिन्वः । हिनुमः–हिन्मः ॥ 2. **लोट्** । **प्र०** हिनोतु–हिनुतात् ॥ **म०** हिनु–तात् ॥ उ० हिनवानि ॥ 3. **लङ्** । अहिनोत् । 4. **विधि०** । हिनुयात् । हिनुयाताम् ॥

5. **लिट्** । **प्र०** जिघाय । जिघ्यतुः । जिघ्युः ॥ **म०** जिघयिथ–जिघेथ । जिघ्यथुः । जिघ्य ॥ उ० जिघाय–जिघय । जिघ्यिव । जिघ्यिम ॥ 6. **लुट्** । हेता ॥ 7. **लृट्** । हेष्यति ॥ 8. **आशी०** । हीयात् । हीयास्ताम् ॥

9. लुङ् । VI. अहैषीत् । अहैष्टाम् ॥ 10. लृङ् । अहेष्यत् ॥

[२८८] अशू = व्याप्तौ । संघाते च । सक० । वेट् । आत्म० । to pervade ; to accumulate.

1. लट् । प्र० अश्नुते । अश्नुवाते । अश्नुवते ॥ म० अश्नुषे । अश्नुवाथे । अश्नुध्वे ॥ उ० अश्नुवे । अश्नुवहे । अश्नुमहे ॥ 2. लोट् । प्र० अश्नुताम् । अश्नुवाताम् । अश्नुवताम् ॥ म० अश्नुष्व । अश्नुवाथाम् । अश्नुध्वम् ॥ उ० अश्नवै । अश्नवावहै । अश्नवामहै ॥ 3. लङ् । प्र० आश्नुत । आश्नुवाताम् । आश्नुवत ॥ म० आश्नुथाः । आश्नुवाथाम् । आश्नुध्वम् ॥ उ० आश्नुवि । आश्नुवहि । आश्नुमहि ॥ 4. विधि० । प्र० अश्नुवीत । अश्नुवीयाताम् । अश्नुवीरन् ॥ म० अश्नुवीथाः । अश्नुवीयाथाम् । अश्नुवीध्वम् ॥ उ० अश्नुवीय । अश्नुवीवहि । अश्नुवीमहि ॥

5. लिट् । प्र० आनशे । आनशाते । आनशिरे ॥ म० आनशिषे--आनक्षे ॥ आनशाथे । आनशिध्वे–आनड्ढ्वे ॥ उ० आनशे । आनशिवहे–आनश्वहे । आनशिमहे—आनश्महे ॥ 6. लुट् । अशिता–अष्टा ॥ 7. लृट् । अशिष्यते–अक्ष्यते ॥ 8. आशी० । इट्पक्षे—प्र० अशि-

षीष्ट । अशिषीयास्ताम् । अशिषीरन् ॥ म० अशिषीष्ठाः । अशिषीयास्थाम् । अशिषीध्वम् ॥ उ० अशिषीय । अशिषीवहि । अशिषीमहि ॥ **इडभावपक्षे—प्र०** अक्षीष्ट । अक्षीयास्ताम् । अक्षीरन् ॥ **म०** अक्षीष्ठाः । अक्षीयास्थाम् । अक्षीध्वम् ॥ **उ०** अक्षीय । अक्षीवहि । अक्षीमहि ॥ 9. **लुङ्** । **इट्पक्षे**—XI. **प्र०** आशिष्ट । आशिषाताम् । आशिषत ॥ **म०** आशिष्ठाः । आशिषाथाम् । आशिध्वम्–आशिढ्ढ्वम् ॥ **उ०** आशिषि । आशिष्वहि । आशिष्महि ॥ **इडभावपक्षे**—X. **प्र०** आष्ट । आक्षाताम् । आक्षत ॥ **म०** आष्ठाः । आक्षाथाम् । आड्ढ्वम् ॥ **उ०** आक्षि । आक्ष्वहि । आक्ष्महि ॥ 10. **लृङ्** । **इट्पक्षे—प्र०** आशिष्यत । आशिष्येताम् । आशिष्यन्त ॥ **म०** आशिष्यथाः । आशिष्येथाम् । आशिष्यध्वम् । **उ०** आशिष्ये । आशिष्यावहि । आशिष्यामहि ॥ **इडभावपक्षे**—आक्ष्यत । आक्ष्येताम् । आक्ष्यन्त ॥ इत्यादि ॥

[२८९] **चिञ्** (चि) = चयने । द्विक० । अनि० । उभ० । to heap up ; to collect.

परस्मैपदे— 1. **लट्** । **प्र०** चिनोति । चिनुतः । चिन्वन्ति ॥ **म०** चिनोषि । चिनुथः । चिनुथ ॥ **उ०** चिनोमि । चिनुवः–चिन्वः । चिनुमः–चिन्मः ॥ 2.

लोट् । प्र० चिनोतु–चिनुतात् । चिनुताम् । चिन्वन्तु ॥ म० चिनु--चिनुतात् । चिनुतम् । चिनुत ॥ उ० चिनवानि । चिनवाव । चिनवाम ॥ 3. लङ् । प्र० अचिनोत् । अचिनुताम् । अचिन्वन् ॥ म० अचिनोः । अचिनुतम् । अचिनुत ॥ उ० अचिनवम् । अचिनुव--अचिन्व । अचिनुम--अचिन्म ॥ 4. विधि० । चिनुयात् ॥

5. लिट् । प्र० चिकाय । चिक्यतुः । चिक्युः ॥ म० चिकयिथ--चिकेथ । चिक्यथुः । चिक्य ॥ उ० चिकाय--चिकय । चिक्यिव । चिक्यिम ॥ पक्षे—चिचाय । चिच्यतुः । चिच्युः इत्यादि ॥ 6. लुट् । प्र० चेता ॥ म० चेतासि ॥ उ० चेतास्मि ॥ 7. लृट् । चेष्यति ॥ 8. आशी० । चीयात् । चीयास्ताम् ॥ 9. लुङ् । VI. प्र० अचैषीत् । अचैष्टाम् ॥ 10. लृङ् । अचेष्यत् ॥

आत्मनेपदे—1. लट् । प्र० चिनुते । चिन्वाते । चिन्वते ॥ म० चिनुषे । चिन्वाथे । चिनुध्वे ॥ उ० चिन्वे । चिनुवहे–चिन्वहे । चिनुमहे–चिन्महे ॥ 2. लोट् । प्र० चिनुताम् । चिन्वाताम् । चिन्वताम् ॥ म० चिनुष्व । चिन्वाथाम् । चिनुध्वम् ॥ उ० चिनवै । चिनवावहै । चिनवामहै ॥ 3. लङ् । प्र० अचिनुत । अचिन्वाताम् । अचिन्वत ॥ म० अचिनुथाः । अचिन्वाथाम् । अचिनुध्वम् ॥

उ० अचिन्वि । अचिनुवहि–अचिन्वहि । अचिनुमहि–अचिन्महि ॥ 4. **विधि०** । **प्र०** चिन्वीत । चिन्वीयाताम् । चिन्वीरन् ॥ **म०** चिन्वीथाः । चिन्वीयाथाम् । चिन्वीध्वम् ॥ उ० चिन्वीय । चिन्वीवहि । चिन्वीमहि ॥

5. **लिट्** । **प्र०** चिक्ये । चिक्याते । चिक्यिरे ॥ **म०** चिक्यिषे । चिक्याथे । चिक्यिध्वे–ढ्वे ॥ **उ०** चिक्ये । चिक्यिवहे । चिक्यिमहे ॥ **पक्षे**–चिच्ये । चिच्याते । चिच्यिरे ॥ इत्यादि ॥ 6. **लुट्** । **प्र०** चेता ॥ **म०** चेतासे ॥ **उ०** चेताहे ॥ 7. **लृट्** । चेष्यते ॥ 8. **आशी०** । **प्र०** चेषीष्ट । चेषीयास्ताम् । चेषीरन् ॥ **म०** चेषीढ्वम् ॥ 9. **लुङ्** । X. **प्र०** अचेष्ट । अचेषाताम् । अचेषत ॥ **म०** अचेढ्वम् ॥ 10. **लृङ्** । अचेष्यत ॥

[२९०] **षुञ्** (सु) = स्नपन-पीडन-स्नान-सुरासन्धानेषु । अक०–सक० । अनि० । उभ० । to sprinkle; to pour out; to bathe; to press out juice.

परस्मैपदे–1. **लट्** । **प्र०** सुनोति । सुनुतः । सुन्वन्ति ॥ **म०** सुनोषि । सुनुथः । सुनुथ ॥ **उ०** सुनोमि । सुनुवः–सुन्वः । सुनुमः–सुन्मः ॥ 2. **लोट्** । **प्र०** सुनोतु–सुनुतात् ॥ सुनुताम् । सुन्वन्तु ॥ **म०** सुनु–सुनुतात् । सुनुतम् । सुनुत ॥ **उ०** सुनवानि । सुनवाव । सुनवाम ॥ 3. **लङ्** । **प्र०** असुनोत् । असुनुताम् । असुन्वन् ॥ **म०** असुनोः । असुनुतम् । असु-

नुत ॥ उ० असुनवम् । असुनुव–असुन्व । असुनुम–असुन्म ॥ 4. विधि० । प्र० सुनुयात् । सुनुयाताम् । सुनुयुः ॥ म० सुनुयाः । सुनुयातम् । सुनुयात ॥ उ० सुनुयाम् । सुनुयाव । सुनुयाम ॥

5. लिट् । प्र० सुषाव । सुषुवतुः । सुषुवुः ॥ म० सुषविथ–सुषोथ । सुषुवथुः । सुषुव ॥ उ० सुषाव--सुषव । सुषुविव । सुषुविम ॥ 6. लुट् । प्र० सोता ॥ म० सोतासि ॥ उ० सोतास्मि ॥ 7. लृट् । सोष्यति ॥ 8. आशी० । प्र० सूयात् । सूयास्ताम् । सूयासुः ॥ 9. लुङ् । VI. प्र० असावीत् । असाविष्टाम् । असाविषुः ॥ म० असावीः । असाविष्टम् । असाविष्ट ॥ उ० असाविषम् । असाविष्व । असाविष्म ॥ 10. लृङ् । असोष्यत् ॥

आत्मनेपदे—1. लट् । प्र० सुनुते । सुन्वाते । सुन्वते । म० सुनुषे । सुन्वाथे । सुनुध्वे ॥ उ० सुन्वे । सुनुवहे--सुन्वहे । सुनुमहे-सुन्महे ॥ 2. लोट् । प्र० सुनुताम् । सुन्वाताम् । सुन्वताम् ॥ म० सुनुष्व । सुन्वाथाम् । सुनुध्वम् ॥ उ० सुनवै । सुनवावहै । सुनवामहै ॥ 3. लङ् । प्र० असुनुत । असुन्वाताम् । असुन्वत ॥ म० असुनुथाः । असुन्वाथाम् । असुनुध्वम् । उ० असुन्वि । असुनुवहि–असुन्वहि । असुनुमहि–असुन्महि ॥ 4. विधि० । प्र०

सुन्वीत । सुन्वीयाताम् । सुन्वीरन् ॥ म० सुन्वीथाः । सुन्वीयाथाम् । सुन्वीध्वम् ॥ उ० सुन्वीय । सुन्वीवहि । सुन्वीमहि ॥

5. लिट् । प्र० सुषुवे । सुषुवाते । सुषुविरे ॥ म० सुषुविषे । सुषुवाथे । सुषुविढ्वे--ध्वे ॥ उ० सुषुवे । सुषुविवहे । सुषुविमहे ॥ 6. लुट् । प्र० सोता ॥ म० सोतासे ॥ उ० सोताहे ॥ 7. लृट् । सोष्यते ॥ 8. आशी० । प्र० सोषीष्ट ॥ म० सोषीढ्वम् ॥ 9. लुङ् । X. प्र० असोष्ट । असोषाताम् । असोषत ॥ म० असोष्ठाः । असोषाथाम् । असोढ्वम् । उ० असोषि । असोष्वहि । असोष्महि ॥ 10. लृङ् । असोष्यत ॥

[२९१] धुञ् (धु) = कंपने । सक० । अनि० । उभ० । to shake. षुञ् (२९०) धातुवत् । परस्मैपदे—9. लुङ् । VI. अधौषीत् । आत्म० । X. अधोष्ट । इति ॥

[२९२] धूञ् (धू) = कंपने । सक० । वेट्० । उभ० । to shake.

परस्मैपदे—धुञ् (२९१) धातुवत् । किंतु--"धु" इति स्थाने धू इति दीर्घो विशेषः । अपि च । 5. लिट् । दुधाव । दुधुवतुः । इत्यादिषु ह्रस्व एव । 6. लुट् । धविता--धोता ॥ 7. लृट् । धविष्यति--धोष्यति ॥ 8. आशी० । धूयात् । धूयास्ताम् ॥ 9. लुङ् । VII.

अधावीत् । अधाविष्टाम् । अधाविषुः ॥ 10. ऌङ् । अधविष्यत्--अधोष्यत् ॥

आत्मनेपदे—1. लट् । धूनुते । धून्वाते ॥ 2. लोट् । धूनुताम् । धून्वाताम् ॥ 3. लङ् । अधूनुत । अधून्वाताम् ॥ 4. **विधि०** । धून्वीत । धून्वीयाताम् ॥

5. **लिट्** । **प्र०** दुधुवे । दुधुवाते । दुधुविरे ॥ **म०** ध्वे--ढ्वे ॥ 6. लुट् । धोता–धविता ॥ 7. ऌट् । धोष्यते–धविष्यते ॥ 8. **आशी०** । धोषीष्ट–धविषीष्ट ॥ 9. लुङ् । X. **प्र०** अधोष्ट । अधोषाताम् । अधोषत ॥ **म०** अधोढ्वम् ॥ **पक्षे**—XI. **प्र०** अधविष्ट । अधविषाताम् । अधविषत ॥ **म०** अधविध्वम्--ढ्वम् ॥ 10. ऌङ् । अधोष्यत–अधविष्यत ॥

[२९३] **स्तृञ्** (स्तृ) = आच्छादने । सक० । अनि० । उभ० । to cover.

परस्मैपदे—1. लट् । **प्र०** स्तृणोति । स्तृणुतः । स्तृण्वन्ति ॥ **म०** स्तृणोषि । स्तृणुथः । स्तृणुथ ॥ **उ०** स्तृणोमि । स्तृणुवः–स्तृण्वः । स्तृणुमः–स्तृण्मः ॥ 2. लोट् । **प्र०** स्तृणोतु--स्तृणुतात् । स्तृणुताम् । स्तृण्वन्तु ॥ **म०** स्तृणु--स्तृणुतात् । स्तृणुतम् । स्तृणुत ॥ **उ०** स्तृणवानि । स्तृणवाव । स्तृणवाम ॥ 3. लङ् । **प्र०** अस्तृणोत् । अस्तृणुताम् । अस्तृण्वन् ॥ **म०** अस्तृणोः । अस्तृणुतम् ।

अस्तृणुत ॥ उ० अस्तृणवम् । अस्तृणुव–अस्तृण्व । अस्तृणुम–अस्तृण्म ॥ 4. विधि० । प्र० स्तृणुयात् । स्तृणुयाताम् । स्तृणुयुः । म० स्तृणुयाः ॥ उ० स्तृणुयाम् ॥

5. लिट् । प्र० तस्तार । तस्तरतुः । तस्तरुः ॥ म० तस्तर्थ । तस्तरथुः । तस्तर ॥ उ० तस्तार--तस्तर । तस्तरिव । तस्तरिम ॥ 6. लुट् । प्र० स्तर्ता ॥ म० स्तर्तासि ॥ उ० स्तर्तास्मि ॥ 7. लृट् । स्तरिष्यति ॥ 8. आशी० । स्तर्यात् । स्तर्यास्ताम् ॥ 9. लुङ् । VI. अस्तार्षीत् । अस्तार्ष्टाम् । अस्तार्षुः ॥ 10. लृङ् । अस्तरिष्यत् ॥

आत्मनेपदे—1. लट् । प्र० स्तृणुते । स्तृण्वाते । स्तृण्वते ॥ म० स्तृणुषे । स्तृण्वाथे । स्तृणुध्वे ॥ उ० स्तृण्वे । स्तृणुवहे–स्तृण्वहे । स्तृणुमहे–स्तृण्महे ॥ 2. लोट् । प्र० स्तृणुताम् । स्तृण्वाताम् । स्तृण्वताम् ॥ म० स्तृणुष्व । स्तृण्वाथाम् । स्तृणुध्वम् ॥ उ० स्तृणवै । स्तृणवावहै । स्तृणवामहै ॥ 3. लङ् । प्र० अस्तृणुत । अस्तृण्वाताम् । अस्तृण्वत ॥ म० अस्तृणुथाः । अस्तृण्वाथाम् । अस्तृणुध्वम् ॥ उ० अस्तृण्वि । अस्तृणुवहि–अस्तृण्वहि । अस्तृणुमहि–अस्तृण्महि ॥ 4. विधि० । प्र० स्तृण्वीत । स्तृण्वीयाताम् । स्तृण्वीरन् ॥ म० स्तृ-

ण्वीथाः । स्तृण्वीयाथाम् । स्तृण्वीध्वम् ॥ उ० स्तृण्वीय । स्तृण्वीवहि । स्तृण्वीमहि ॥

5. लिट् । प्र० तस्तरे । तस्तराते । तस्तरिरे ॥ म० तस्तरिषे । तस्तराथे । तस्तरिध्वे--ढ्वे ॥ उ० तस्तरे । तस्तरिवहे । तस्तरिमहे ॥ 6. लुट् । स्तर्ता ॥ 7. लृट् । स्तरिष्यते ॥ 8. आशी० । प्र० स्तरिषीष्ट । स्तरिषीयास्ताम् । स्तरिषीरन् ॥ म० स्तरिषीष्ठाः । स्तरिषीयास्थाम् । स्तरिषीध्वम्--ढ्वम् ॥ उ० स्तरिषीय । स्तरिषीवहि । स्तरिषीमहि ॥ पक्षे--प्र० स्तृषीष्ट । स्तृषीयास्ताम् । स्तृषीरन् ॥ म० स्तृषीढ्वम् ॥ इत्यादि ॥ 9. लुङ् । XI. प्र० अस्तरिष्ट । अस्तरिषाताम् । अस्तरिषत ॥ म० अस्तरिष्ठाः । अस्तरिषाथाम् । अस्तरिध्वम्--ढ्वम् ॥ उ० अस्तरिषि । अस्तरिष्वहि । अस्तरिष्महि ॥ इडभावपक्षे—X. प्र० अस्तृत । अस्तृषाताम् । अस्तृषत ॥ म० अस्तृथाः । अस्तृषाथाम् । अस्तृढ्वम् ॥ उ० अस्तृषि । अस्तृष्वहि । अस्तृष्महि ॥ 10. लृङ् । अस्तरिष्यत ॥

[२९४] कृञ् (कृ) = हिंसायाम् । सक० । अनि० । उभ० । to hurt; to kill.

परस्मैपदे—सार्वधातुके । स्तृञ् (२९३) धातुवत् । 5. लिट् । प्र० चकार । चक्रतुः । चक्रुः ॥ म०

चकर्थ । चक्रथुः । चक्र ॥ उ० चकार–चकर । चकृव । चकृम ॥ 6. लुट् । कर्ता ॥ 7. लृट् । करिष्यति ॥ 8. आशी० । क्रियात् । क्रियास्ताम् ॥ 9. लुङ् । VI. अकार्षीत् । अकार्ष्टाम् । अकार्षुः ॥ 10. लृङ् । अकरिष्यत् ॥

आत्मनेपदे—सार्वधातुके--स्तृञ् (२९३) धातुवत् । 5. लिट् । प्र० चक्रे । चक्राते । चक्रिरे ॥ म० चकृषे । चक्राथे । चकृढ्वे ॥ उ० चक्रे । चकृवहे । चकृमहे ॥ 6. लुट् । प्र० कर्ता ॥ म० कर्तासे ॥ उ० कर्ताहे ॥ 7. लृट् । करिष्यते ॥ 8. आशी० । प्र० कृषीष्ट । कृषीयास्ताम् । कृषीरन् ॥ म० कृषीष्ठाः । कृषीयास्थाम् । कृषीढ्वम् ॥ उ० कृषीय । कृषीवहि । कृषीमहि ॥ 9. लुङ् । X. प्र० अकृत । अकृषाताम् । अकृषत ॥ म० अकृथाः । अकृषाथाम् । अकृढ्वम् ॥ उ० अकृषि । अकृष्वहि । अकृष्महि ॥ 10. लृङ् । अकरिष्यत ॥

[२९५] वृञ् (वृ) = वरणे । सक० । सेट् । उभ० । to choose.

परस्मैपदे—सार्वधातुकेलिटि च, कृञ् (२९४) धातुवत् । 6. लुट् । वरिता–वरीता ॥ 7. लृट् । वरिष्यति–वरीष्यति ॥ 8. आशी० । व्रियात् । व्रियास्ताम् ॥ 9. लुङ् । VII. प्र० अवारीत् । अवारिष्टाम् । अवारिषुः ॥

10. लृङ् । अवरिष्यत्--अवरीष्यत् ॥

आत्मनेपदे—सार्वधातुके लिटि च कृञ् (२९४) धातुवत् । 6. लुट् । वरिता--वरीता ॥ 7. लृट् । वरिष्यते--वरीष्यते ॥ 8. आशी० । म० वृषीष्ट--वरिषीष्ट ॥ म० वृषीढ्वम्--वरिषीढ्वम्—ध्वम् ॥ 9. लुङ् । X. and XI. प्र० अवृत--अवरिष्ट--अवरीष्ट । अवृषाताम्--अवरिषाताम्--अवरीषाताम् । अवृषत--अवरिषत--अवरीषत ॥ म० अवृढ्वम्--अवरिध्वम्--ढ्वम्--अवरीध्वम्--ढ्वम् ॥ इत्यादि ॥
10. लृङ् । अवरिष्यत--अवरीष्यत ॥

इति स्वादयः ॥ ५ ॥

श्रीशाय नमः ।

मध्यमधातुरूपावल्याम् ।

तुदादयः ॥ ६ ॥

परस्मैपदिनः ।

[२९६] प्रच्छ (पृच्छ्) = ज्ञीप्सायाम् । सक० । अनि० । पर० । to ask.

1. लट् । प्र० पृच्छति । पृच्छतः । पृच्छन्ति ॥ म० पृच्छसि । पृच्छथः । पृच्छथ ॥ उ० पृच्छामि । पृच्छावः । पृच्छामः ॥ 2. लोट् । प्र० पृच्छतु--पृच्छतात् । पृच्छताम् । पृच्छन्तु ॥ म० पृच्छ--पृच्छतात् । पृच्छतम् । पृच्छत ॥ उ० पृच्छानि । पृच्छाव । पृच्छाम ॥ 3. लङ् । प्र० अपृच्छत् । अपृच्छताम् । अपृच्छन् ॥ म० अपृच्छः । अपृच्छतम् । अपृच्छत ॥ उ० अपृच्छम् । अपृच्छाव । अपृच्छाम ॥

4. विधि० । प्र० पृच्छेत् । पृच्छेताम् । पृच्छेयुः ॥ म० .

पृच्छेः । पृच्छेतम् । पृच्छेत ॥ उ० पृच्छेयम् । पृच्छेव । पृच्छेम ॥

5. लिट् । प्र० पप्रच्छ । पप्रच्छतुः । पप्रच्छुः ॥ म० पप्रच्छिथ--पप्रष्ठ । पप्रच्छथुः । पप्रच्छ ॥ उ० पप्रच्छ । पप्रच्छिव । पप्रच्छिम ॥

6. लुट् । प्र० प्रष्टा । प्रष्टारौ । प्रष्टारः ॥ म० प्रष्टासि । प्रष्टास्थः । प्रष्टास्थ ॥ उ० प्रष्टास्मि । प्रष्टास्वः । प्रष्टास्मः ॥

7. लृट् । प्र० प्रक्ष्यति । प्रक्ष्यतः । प्रक्ष्यन्ति ॥ म० प्रक्ष्यसि । प्रक्ष्यथः । प्रक्ष्यथ ॥ उ० प्रक्ष्यामि । प्रक्ष्यावः । प्रक्ष्यामः ॥ 8. आशी० । प्र० पृच्छ्यात् । पृच्छ्यास्ताम् । पृच्छ्यासुः ॥ म० पृच्छ्याः । पृच्छ्यास्तम् । पृच्छ्यास्त ॥ उ० पृच्छ्यासम् । पृच्छ्यास्व । पृच्छ्यास्म ॥ 9. लुङ् । VI. प्र० अप्राक्षीत् । अप्राष्टाम् । अप्राक्षुः ॥ म० अप्राक्षीः । अप्राष्टम् । अप्राष्ट ॥ उ० अप्राक्षम् । अप्राक्ष्व ॥ अप्राक्ष्म ॥

10. लृङ् । प्र० अप्रक्ष्यत् । अप्रक्ष्यताम् । अप्रक्ष्यन् ॥ म० अप्रक्ष्यः । अप्रक्ष्यतम् । अप्रक्ष्यत ॥ उ० अप्रक्ष्यम् । अप्रक्ष्याव । अप्रक्ष्याम ॥

[२९७] सृज = विसर्गे । सक० । अनि० । पर० । to abandon; to create; to let loose.

1. लट् । सृजति ॥ 2. लोट् । सृजतु ॥ 3. लङ् । असृजत् ॥ 4. विधि० । सृजेत् ॥

5. लिट् । प्र० ससर्ज । ससृजतुः । ससृजुः ॥ म० ससर्जिथ--सस्रष्ठ । ससृजथुः । ससृज ॥ उ० ससर्ज । ससृजिव । ससृजिम ॥ 6. लुट् । स्रष्टा ॥ 7. लृट् । स्रक्ष्यति ॥ 8. आशी० । सृज्यात् । सृज्यास्ताम् ॥ 9. लुङ् । VI. अस्राक्षीत् । अस्राष्टाम् ॥ 10. लृङ् । अस्रक्ष्यत् ॥

[२९८] स्पृश = संस्पर्शे । सक० । अनि० । पर० । to touch. सार्वधातुके स्पृशति इत्यादि रूपम् ॥

5. लिट् । प्र० पस्पर्श । पस्पृशतुः । पस्पृशुः ॥ म० पस्पर्शिथ--पस्प्रष्ठ--पस्पर्ष्ठ । पस्पृशथुः । पस्पृश ॥ उ० पस्पर्श । पस्पृशिव । पस्पृशिम ॥ 6. लुट् । स्प्रष्टा--स्पर्ष्टा ॥ 7. लृट् । स्प्रक्ष्यति--स्पर्क्ष्यति ॥ 8. आशी० । स्पृश्यात् । स्पृश्यास्ताम् ॥ 9. लुङ् । VI. प्र० अस्प्राक्षीत् । अस्प्राष्टाम् । अस्प्राक्षुः ॥ म० अस्प्राक्षीः । अस्प्राष्टम् । अस्प्राष्ट ॥ उ० अस्प्राक्षम् । अस्प्राक्ष्व । अस्प्राक्ष्म ॥ अमागमाभावपक्षे--अस्पार्क्षीत् । अस्पार्ष्टाम् । अस्पार्क्षुः ॥ अथवा--V. अस्पृक्षत् । अस्पृक्षताम् । अस्पृक्षन् ॥ 10. लृङ् । अस्प्रक्ष्यत्--अस्पर्क्ष्यत् ॥

[२९९] टु मस्जो (मस्ज्--मज्ज्) = शुद्धौ । अक० । अनि० ।

पर० । to purify ; to bathe ; to sink. 1. लट् । मज्जति ॥ 2. लोट् । मज्जतु ॥ 3. लङ् । अमज्जत् ॥ 4. विधि० । मज्जेत् ॥

5. लिट् । प्र० ममज्ज । ममज्जतुः । ममज्जुः ॥ म० ममज्जिथ—ममङ्क्थ । ममज्जथुः । ममज्ज ॥ उ० ममज्ज । ममज्जिव । ममज्जिम ॥ 6. लुट् । मङ्क्ता ॥ 7. लृट् । मङ्क्ष्यति ॥ 8. आशी० । मज्ज्यात् । मज्ज्यास्ताम् ॥ 9. लुङ् । VI. प्र० अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ॥ 10. लृङ् । अमङ्क्ष्यत् ॥

[३००] ओव्रश्चू (व्रश्च्) = छेदने । सक० । वेट् । पर० । to cut; to wound; to tear. सार्वधातुके 1. लट् । वृश्चति ॥ 2. लोट् । वृश्चतु ॥ 3. लङ् । अवृश्चत् ॥ 4. विधि० । वृश्चेत् ॥

5. लिट् । प्र० वव्रश्च । वव्रश्चतुः । वव्रश्चुः ॥ म० वव्रश्चिथ--वव्रष्ठ । वव्रश्चथुः । वव्रश्च ॥ उ० वव्रश्च । वव्रश्चिव--वव्रश्च्व । वव्रश्चिम--वव्रश्च्म ॥ 6. लुट् । व्रश्चिता--व्रष्टा । 7. लृट् । व्रश्चिष्यति--व्रक्ष्यति ॥ 8. आशी० । वृश्च्यात् । वृश्च्यास्ताम् ॥ 9. लुङ् । VII. अव्रश्चीत् । अव्रश्चिष्टाम् । अव्रश्चिषुः ॥ पक्षे—अव्राक्षीत् । अव्राष्टाम् । अव्राक्षुः ॥ 10. लृङ् । अव्रश्चिष्यत्--अव्रक्ष्यत् ॥

[३०१] **विश** = प्रवेशने । सक० । अनि० । पर० । to enter.
1. **लट्** । विशति ॥ 2. **लोट्** । विशतु ॥ 3. **लङ्** । अविशत् 4. **विधि०** । विशेत् ॥

5. **लिट्** । **प्र०** विवेश । विविशतुः । विविशुः ॥ **म०** विवेशिथ । विविशथुः । विविश ॥ **उ०** विवेश । विविशिव । विविशिम ॥ 6. **लुट्** । वेष्टा ॥ 7. **लृट्** । वेक्ष्यति ॥ 8. **आशी०** । विश्यात् । विश्यास्ताम् । 9. **लुङ्** । V. अविक्षत् । अविक्षताम् । अविक्षन् ॥ 10. **लृङ्** । अवेक्ष्यत् ॥

[३०२] **इष** (इच्छ्) = इच्छायाम् । सक० । सेट् । पर० । to wish.

1. **लट्** । इच्छति ॥ 2. **लोट्** । इच्छतु ॥ 3. **लङ्** । ऐच्छत् ॥ 4. **विधि०** । इच्छेत् ॥

5. **लिट्** । **प्र०** इयेष । ईषतुः । ईषुः ॥ **म०** इयेषिथ । ईषथुः । ईष ॥ **उ०** इयेष । ईषिव । ईषिम ॥ 6. **लुट्** । एषिता–एष्टा ॥ 7. **लृट्** । एषिष्यति ॥ 8. **आशी०** । इष्यात् । इष्यास्ताम् ॥ 9. **लुङ्** । VII. ऐषीत् । ऐषिष्टाम् । ऐषिषुः ॥ 10. **लृङ्** । ऐषिष्यत् ॥

[३०३] **मृश** = स्पर्शने । सक० । अनि० । पर० । to touch.
स्पृश (२९८) धातुवत् ॥ मृशति ॥ ममर्श ॥

[३०४] स्फुर = संचलने स्फुरणे च। अक०। सेट्। पर०। to tremble; to throb.

1. लट्। स्फुरति ॥ 2. लोट्। स्फुरतु ॥ 3. लङ्। अस्फुरत् ॥ 4. विधि०। स्फुरेत् ॥

5. लिट्। प्र० पुस्फोर। पुस्फुरतुः। पुस्फुरुः ॥ म० पुस्फुरिथ। पुस्फुरथुः। पुस्फुर ॥ उ० पुस्फोर। पुस्फुरिव। पुस्फुरिम ॥ 6. लुट्। स्फुरिता ॥ 7. लृट्। स्फुरिष्यति ॥ 8. आशी०। स्फूर्यात्। स्फूर्यास्ताम् ॥ 9. लुङ्। VII. अस्फुरीत्। अस्फुरिष्टाम्। अस्फुरिषुः ॥ 10. लृङ्। अस्फुरिष्यत् ॥

[३०५] स्फुट = विकसने। अक०। सेट्। पर०। to blossom; to open; to split. **स्फुर** (३०४) धातुवत् ॥

[३०६] त्रुट = छेदने। अक०। सेट्। पर०। to tear; to break. **स्फुर** (३०४) धातुवत्। किंच सार्वधातुके—

1. लट्। त्रुट्यति ॥ 2. लोट्। त्रुट्यतु ॥ 3. लङ्। अत्रुट्यत् ॥ 4. विधि०। त्रुट्येत् ॥ इत्यपि रूपम् इति विशेषः।

[३०७] लिख = अक्षरविन्यासे। सक०। सेट्। पर०।

1. लट् । लिखति ॥ 2. लोट् । लिखतु ॥ 3. लङ् । अलिखत् ॥ 4. विधि० । लिखेत् ॥

5. लिट् । लिलेख । लिलिखतुः ॥ 6. लुट् । लेखिता ॥ 7. लृट् । लेखिष्यति ॥ 8. आशी० । लिख्यात् ॥ 9. लुङ् । VII. अलेखीत् ॥ 10. लृङ् । अलेखिष्यत् ॥

[३०८] कृती (कृन्त्) = छेदने । सक० । सेट् । पर० । to cut; to divide. सार्वधातुके—कृन्तति इत्यादि ।

5. लिट् । प्र० चकर्त । चकृततुः । चकृतुः ॥ म० चकर्तिथ । चकृतथुः । चकृत ॥ उ० चकर्त । चकृतिव । चकृतिम ॥ 6. लुट् । कर्तिता ॥ 7. लृट् । कर्तिष्यति । कर्त्स्यति ॥ 8. आशी० । कृत्यात् । कृत्यास्ताम् ॥ 9. लुङ् । VII. अकर्तीत् । अकर्तिष्टाम् । अकर्तिषुः ॥ 10. लृङ् । अकर्तिष्यत्-अकर्त्स्यत् ॥

[३०९] कॄ = विक्षेपे । सक० । सेट् । पर० । to pour out; to scatter. सार्वधातुके किरति इत्यादि ।

5. लिट् । प्र० चकार । चकरतुः । चकरुः ॥ म० चकरिथ । चकरथुः । चकर ॥ उ० चकार--चकर । चकरिव । चकरिम ॥ 6. लुट् । करिता–करीता ॥ 7. लृट् । करिष्यति–करीष्यति ॥ 8. आशी० । कीर्यात् ।

कीर्यास्ताम् ॥ 9. लुङ् । VII. अकारीत् । अकारिष्टाम् । अकारिषुः ॥ 10. लृङ् । अकरिष्यत्–अकरीष्यत् ॥

[३१०] गॄ = निगरणे । सक० । सेट् । पर० । to swallow; to devour; to emit.

1. लट् । गिरति–गिलति ॥ 2. लोट् । गिरतु–गिलतु ॥ 3. लङ् । अगिरत्--अगिलत् ॥ 4. विधि० । गिरेत्–गिलेत् ॥

5. लिट् । प्र० जगार । जगरतुः । जगरुः ॥ म० जगरिथ । जगरथुः । जगर ॥ उ० जगार--जगर । जगरिव । जगरिम । पक्षे–जगाल । जगलतुः । इत्यादि । 6. लुट् । गरिता--गरीता; गलिता–गलीता ॥ 7. लृट् । गरिष्यति–गरीष्यति; गलिष्यति–गलीष्यति ॥ 8. आशी० । गीर्यात् । गीर्यास्ताम् ॥ 9. लुङ् । VII. अगारीत्–अगालीत् ॥ 10. लृङ् । अगरिष्यत्--अगरीष्यत् ॥ अगलिष्यत्--अगलीष्यत् ॥

[३११] क्षि = निवासगत्योः । अक० । अनि० । पर० । to dwell.

1. लट् । क्षियति ॥ 2. लोट् । क्षियतु ॥ 3. लङ् । अक्षियत् ॥ 4. विधि० । क्षियेत् ॥ आर्धधातुके क्षि (८६) धातुवत् ॥

[३१२] धि = धारणे । सक० । अनि० । पर० । to have;

to hold. सर्वं क्षि (३११) धातुवत्। 5. लिट्। प्र० दिधाय। दिध्यतुः। दिध्युः॥ म० दिधयिथ–दिधेथ। दिध्यथुः। दिध्य॥ उ० दिधाय--दिधय। दिध्यिव। दिध्यिम॥

[३१३] षू (सू) = प्रेरणे। सक०। सेट्। पर०। to excite; to impel.

1. लट्। सुवति॥ 2. लोट्। सुवतु॥ 3. लङ्। असुवत्॥ 4. विधि०। सुवेत्॥

5. लिट्। प्र० सुषाव। सुषुवतुः। सुषुवुः॥ म० सुषविथ। सुषुवथुः। सुषुव॥ उ० सुषाव--सुषव। सुषुविव। सुषुविम॥ 6. लुट्। प्र० सविता॥ म० सवितासि॥ 7. लृट्। सविष्यति॥ आशी०। सूयात्। सूयास्ताम्॥ 9. लुङ्। VII. असावीत्। असाविष्टाम्। असाविषुः॥ 10. लृङ्। असविष्यत्॥

तुदादावात्मनेपदिनः।

[३१४] दृङ् = आदरे। सक०। अनि०। आत्म०। प्रायेणायमाङ्पूर्वः। to regard.

1. लट्। प्र० आद्रियते॥ म० आद्रियसे॥ उ० आद्रिये॥ 2. लोट्। प्र० आद्रियताम्॥ म० आद्रियस्व॥

उ० आद्रियै ॥ 3. लङ् । प्र० आद्रियत ॥ म० आद्रियथाः । उ० आद्रिये । आद्रियावहि । आद्रियामहि ॥ 4. विधि० प्र० । आद्रियेत । आद्रियेयाताम् । आद्रियेरन् ॥ म० आद्रियेथाः । आद्रियेयाथाम् । आद्रियेध्वम् ॥

5. लिट् । प्र० आदद्रे । आदद्राते । आदद्रिरे ॥ म० आदद्रिषे । आदद्राथे । आदद्रिढ्वे ॥ उ० आदद्रे । आदद्रिवहे । आदद्रिमहे ॥ 6. लुट् । प्र० आदर्ता ॥ म० आदर्तासे ॥ उ० आदर्ताहे ॥ 7. लृट् । आदरिष्यते ॥ 8. आशी० । प्र० आदृषीष्ट । आदृषीयास्ताम् । आदृषीरन् ॥ म० आदृषीष्ठाः । आदृषीयास्थाम् । आदृषीढ्वम् ॥ उ० आदृषीय । आदृषीवहि । आदृषीमहि ॥ 9. लुङ् । X. प्र० आदृत । आदृषाताम् । आदृषत ॥ म० आदृथाः । आदृषाथाम् । आदृढ्वम् । उ० आदृषि । आदृष्वहि । आदृष्महि ॥ 10. लृङ् । आदरिष्यत ॥

[३१५] मृङ् = प्राणत्यागे । अक० । अनि० । आत्म० । to die; to perish.

1. लट् । प्र० म्रियते । म्रियेते । म्रियन्ते ॥ म० म्रियसे ॥ उ० म्रिये ॥ 2. लोट् । प्र० म्रियताम् ॥ म० म्रियस्व ॥ उ० म्रियै ॥ 3. लङ् । प्र० अम्रियत ॥ म० अम्रियथाः ॥ उ० अम्रिये । अम्रियावहि । अम्रियामहि ॥

4. विधि० । प्र० म्रियेत । म्रियेयाताम् । म्रियेरन् ॥ म० म्रियेथाः । उ० म्रियेय ॥

लिट्–लुट्–लृट्–लृङ् इत्येतेषु लकारेष्वयं परस्मैपदी ।

5. लिट् । प्र० ममार । मम्रतुः । मम्रुः ॥ म० ममर्थ । मम्रथुः । मम्र ॥ उ० ममार--ममर । मम्रिव । मम्रिम ॥ 6. लुट् । प्र० मर्ता ॥ म० मर्तासि ॥ उ० मर्तास्मि ॥ 7. लृट् । मरिष्यति ॥ 8. आशी० । प्र० मृषीष्ट ॥ म० मृषीढ्वम् ॥ 9. लुङ् । X. अमृत । अमृषाताम् । अमृषत ॥ म० अमृथाः । अमृषाथाम् । अमृढ्वम् ॥ उ० अमृषि ॥ 10. लृङ् । अमरिष्यत् ॥

[३१६] जुषी (जुष्) = प्रीतिसेवनयोः । सक० । सेट् । आत्म० । to like ; to enjoy. सार्वधातुके जुषते इत्यादि ॥

5. लिट् । प्र० जुजुषे । जुजुषाते । जुजुषिरे ॥ म० जुजुषिषे । जुजुषाथे । जुजुषिध्वे ॥ उ० जुजुषे । जुजुषिवहे । जुजुषिमहे ॥ 6. लुट् । जोषिता ॥ 7. लृट् । जोषिष्यते ॥ 8. आशी० । जोषिषीष्ट ॥ 9. लुङ् । XI. अजोषिष्ट ॥ 10. लृङ् । अजोषिष्यत ॥

[३१७] क्षिप = प्रेरणे । सक० । अनि० । उभ० । to throw.

परस्मैपदे—1. लट् । क्षिपति ॥ 2. लोट् । क्षिपतु ॥ 3. लङ् । अक्षिपत् ॥ 4. विधि० । क्षिपेत् ॥

5. **लिट्** । **प्र०** चिक्षेप । चिक्षिपतुः । चिक्षिपुः ॥ **म०** चिक्षेपिथ । चिक्षिपथुः । चिक्षिप ॥ **उ०** चिक्षेप । चिक्षिपिव । चिक्षिपिम ॥ 6. **लुट्** । क्षेप्ता ॥ 7. **लृट्** । क्षेप्स्यति ॥ 8. **आशी०** । क्षिप्यात् । क्षिप्यास्ताम् ॥ 9. **लुङ्** । VI. **प्र०** अक्षैप्सीत् । अक्षैप्ताम् । अक्षैप्सुः । **म०** अक्षैप्सीः । अक्षैप्तम् । अक्षैप्त ॥ **उ०** अक्षैप्सम् । अक्षैप्स्व । अक्षैप्स्म ॥ 10. **लृङ्** । अक्षेप्स्यत् ॥

आत्मनेपदे—1. **लट्** । क्षिपते ॥ 2. **लोट्** । क्षिपताम् ॥ 3. **लङ्** । अक्षिपत ॥ 4. **विधि०** । क्षिपेत ॥

5. **लिट्** । **प्र०** चिक्षिपे । चिक्षिपाते । चिक्षिपिरे ॥ **म०** चिक्षिपिषे । चिक्षिपाथे । चिक्षिपिध्वे ॥ **उ०** चिक्षिपे । चिक्षिपिवहे । चिक्षिपिमहे ॥ 6. **लुट्** । क्षेप्ता ॥ क्षेप्तासे ॥ 7. **लृट्** । क्षेप्स्यते ॥ 8. **आशी०** । क्षिप्सीष्ट । क्षिप्सीयास्ताम् । क्षिप्सीरन् ॥ 9. **लुङ्** । X. **प्र०** अक्षिप्त । अक्षिप्साताम् । अक्षिप्सत ॥ **म०** अक्षिब्ध्वम् ॥ 10. **लृङ्** । अक्षेप्स्यत ॥

[३१८] दिश = अतिसर्जने (दाने) । सक० । अनि० । उभ० । to grant ; allow.

परस्मैपदे—**क्षिप** (३१७) धातुवत् । 1. **लुङ्** । V. अदिक्षत् । अदिक्षताम् । अदिक्षन् ॥

आत्मनेपदे—क्षिप (३१७) धातुवत् ॥ 9. **लुङ्** । XII. अदिक्षत । अदिक्षाताम् । अदिक्षन्त ॥

[३१९] **षिच** (सिञ्च्) = क्षरणे । सक० । अनि० । उभ० । to sprinkle. **परस्मैपदे**—1. **लट्** । सिञ्चति ॥ 2. **लोट्** । सिञ्चतु ॥ 3. **लङ्** । असिञ्चत् ॥ 4. **विधि०** सिञ्चेत् ॥

5. **लिट्** । **प्र०** सिषेच । सिषिचतुः । सिषिचुः ॥ **म०** सिषेचिथ । सिषिचथुः । सिषिच ॥ **उ०** सिषेच । सिषिचिव । सिषिचिम ॥ 6. **लुट्** । सेक्ता ॥ सेक्तासि ॥ 7. **लृट्** । सेक्ष्यति ॥ 8. **आशी०** । सिच्यात् । सिच्यास्ताम् ॥ 9. **लुङ्** । II. असिचत् । असिचताम् । असिचन् ॥ 10. **लृङ्** । असेक्ष्यत् ॥

आत्मनेपदे—1. **लट्** । सिञ्चते ॥ 2. **लोट्** । सिञ्चताम् ॥ 3. **लङ्** । असिञ्चत ॥ 4. **विधि०** । सिञ्चेत ॥

5. **लिट्** । **प्र०** सिषिचे । सिषिचाते । सिषिचिरे ॥ **म०** सिषिचिषे । सिषिचाथे । सिषिचिध्वे ॥ **उ०** सिषिचे । सिषिचिवहे । सिषिचिमहे ॥ 6. **लुट्** । सेक्ता ॥ सेक्तासे ॥ 7. **लृट्** । सेक्ष्यते ॥ 8. **आशी०** । सिक्षीष्ट । सिक्षीयास्ताम् । सिक्षीरन् ॥ 9. **लुङ्** । VIII. असिचत । असिचेताम् । असिचन्त ॥ पक्षे–X. असिक्त । असिक्षाताम् । असिक्षत ॥ 10. **लृङ्** । असेक्ष्यत ॥

[३२०] **लिप** = उपदेहे । सक० । अनि० । उभ० । to anoint; to cover. **षिच** (३१९) धातुवत् ॥

परस्मैपदे—5. **लिट्** । लिलेप । लिलिपतुः । लिलिपुः ॥ 9. **लुङ्** । II. अलिपत् । अलिपताम् । अलिपन् ॥

आत्मनेपदे—5. **लिट्** । लिलिपे । लिलिपाते । लिलिपिरे ॥ 9. **लुङ्** । VIII. अलिप्त । अलिप्साताम् । अलिप्सत ॥ **पक्षे**—अलिपत । अलिपेताम् । अलिपन्त ॥

[३२१] **लुप्लृ** (लुम्प्) = छेदने । सक० । अनि० । उभ० । **षिच** (३१९) धातुवत् ॥

परस्मैपदे—1. **लट्** । लुंपति ॥ 5. **लिट्** । लुलोप । लुलुपतुः । लुलुपुः ॥ 9. **लुङ्** । II. अलुपत् । अलुपताम् । अलुपन् ॥

आत्मनेपदे—1. **लट्** । लुंपते । 5. **लिट्** । लुलुपे । लुलुपाते । लुलुपिरे ॥ 9. **लुङ्** । X. अलुप्त । अलुप्साताम् । अलुप्सत ॥

[३२२] **मुच्लृ** (मुञ्च्) = मोक्षणे । सक० । अनि० । उभ० । to let loose; to leave; to abandon. **षिच** (३१९) धातुवत् ॥

1. **लट्** । मुञ्चति--ते ॥ 5. **लिट्** । मुमोच--मुमुचे ॥ 9. **लुङ्** । II. अमुचत्–X. अमुक्त ॥

[३२३] **भ्रस्ज** (भृज्ज्) = पाके । सक० । अनि० । उभ० ॥

परस्मैपदे— 1. **लट्** । भृज्जति ॥ 2. **लोट्** । भृज्जतु ॥

3. लङ् । अभृज्जत् ॥ 4. विधि० । भृज्जेत् ॥

5. लिट् । प्र० बभर्ज । बभर्जतुः ॥ बभर्जुः ॥ म० बभर्जिथ--बभर्ष्ठ । बभर्जथुः । बभर्ज ॥ उ० बभर्ज । बभर्जिव । बभर्जिम ॥ रमागमाभावपक्षे-प्र० बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जुः ॥ म० बभ्रज्जिथ--बभ्रष्ठ । बभ्रज्जथुः । बभ्रज्ज ॥ उ० बभ्रज्ज । बभ्रज्जिव । बभ्रज्जिम ॥ 6. लुट् । भ्रष्टा--भर्ष्टा ॥ 7. लृट् । भ्रक्ष्यति--भर्क्ष्यति ॥ 8. आशी० । भृज्ज्यात् ॥ भृज्ज्यास्ताम् ॥ 9. लुङ् । VI. अभ्राक्षीत् । अभ्राष्टाम् । अभ्राक्षुः ॥ रमागमाभावपक्षे–अभार्क्षीत् । अभार्ष्टाम् । अभार्क्षुः । इत्यादि ॥ 10. लृङ् । अभ्रक्ष्यत्--अभर्क्ष्यत् ॥

आत्मनेपदे—1. लट् । भृज्जते । 2. लोट् । भृज्जताम् ॥ 3. लङ् । अभृज्जत ॥ 4. विधि० । भृज्जेत । भृज्जेयाताम् ॥

5. लिट् । प्र० बभर्जे । बभर्जाते । बभर्जिरे ॥ म० बभर्जिषे । बभर्जाथे । बभर्जिध्वे ॥ उ० बभर्जे । बभर्जिवहे । बभर्जिमहे ॥

रमागमाभावपक्षे—प्र० बभ्रज्जे । बभ्रज्जाते । बभ्रज्जिरे ॥ म० बभ्रज्जिषे । बभ्रज्जाथे । बभ्रज्जिध्वे ॥ उ० बभ्रज्जे । बभ्रज्जिवहे । बभ्रज्जिमहे ॥ 6. लुट् । प्र० भ्रष्टा–

भर्ष्टा ॥ म० भ्रष्टासे–भर्ष्टासे ॥ 7. लृट् । भ्रक्ष्यते–भर्क्ष्यते ॥ 8. आशी० । प्र० भ्रक्षीष्ट–भर्क्षीष्ट । भ्रक्षीयास्ताम्--भर्क्षीयास्ताम् ॥ म० भ्रक्षीध्वम्--भर्क्षीध्वम् ॥ 9. लुङ् । X. अभ्रष्ट । अभ्रक्षाताम् । अभ्रक्षत ॥ पक्षे—अभर्ष्ट । अभर्क्षाताम् । अभर्क्षत ॥ 10. लृङ् । अभ्रक्ष्यत--अभर्क्ष्यत ॥

[३२४] षस्ज (सस्ज्--सज्ज्) = गतौ । सक० । सेट् । उभ० । to go ; to become ready.

1. लट् । सज्जति--ते ॥ 2. लोट् । सज्जतु--सज्जतात् । 3. लङ् । असज्जत्--त ॥ 4. विधि० । सज्जेत्--त ॥

5. लिट् । परस्मै०–प्र० ससज्ज । ससज्जतुः । ससज्जुः ॥ म० ससज्जिथ । ससज्जथुः । ससज्ज ॥ उ० ससज्ज । ससज्जिव । ससज्जिम ॥ आत्म०–प्र० ससज्जे । ससज्जाते । ससज्जिरे ॥ म० ससज्जिषे । ससज्जाथे । ससज्जिध्वे ॥ उ० ससज्जे । ससज्जिवहे । ससज्जिमहे ॥ 6. लुट् । सज्जिता ॥ 7. लृट् । सज्जिष्यति--ते ॥ 8. आशी० । परस्मै०--सज्ज्यात् । सज्ज्यास्ताम् । सज्ज्यासुः । आत्म०--सज्जिषीष्ट । सज्जिषीयास्ताम् । सज्जिषीरन् ॥ 9. लुङ् । असज्जीत्--असज्जिष्ट ॥

इति तुदादयः ॥ ६ ॥

श्रीशार्ङ्गपाणये नमः ।

मध्यमधातुरूपावल्याम् ।

रुधादयः ॥ ७ ॥

तत्र परस्मैपदिनः ।

[३२५] शिषॢ (शिष्) = विशेषणे । सक० । अनि० । पर० । प्रायेणायं विपूर्वः । to distinguish from others.

1. लट् । प्र० शिनष्टि । शिंष्टः । शिंषन्ति ॥ म० शिनक्षि । शिंष्ठः । शिंष्ठ ॥ उ० शिनष्मि । शिंष्वः । शिंष्मः ॥ 2. लोट् । प्र० शिनष्टु--शिंष्टात् । शिंष्टाम् । शिंषन्तु ॥ म० शिण्ढि--शिंष्टात् । शिंष्टम् । शिंष्ट ॥ उ० शिनषाणि । शिनषाव । शिनषाम ॥ 3. लङ् । प्र० अशिनट्--ड् । अशिंष्टाम् । अशिंषन् ॥ म० अशिनट्--ड् । अशिंष्टम् । अशिंष्ट ॥ उ० अशिनषम् । अशिंष्व । अशिंष्म ॥ 4. विधि० । प्र० शिंष्यात् । शिंष्याताम् । शिंष्युः ॥ म० शिंष्याः । शिंष्यातम् । शिंष्यात ॥ उ० शिंष्याम् । शिंष्याव । शिंष्याम ॥

5. लिट् । प्र० शिशेष । शिशिषतुः । शिशिषुः ॥ म० शिशेषिथ । शिशिषथुः । शिशिष ॥ उ० शिशेष । शिशिषिव । शिशिषिम ॥ 6. लुट् । प्र० शेष्टा । शेष्टारौ । शेष्टारः ॥ म० शेष्टासि । शेष्टास्थः । शेष्टास्थ । उ० शेष्टास्मि । शेष्टास्वः । शेष्टास्मः ॥ 7. लृट् । प्र० शेक्ष्यति । शेक्ष्यतः । शेक्ष्यन्ति ॥ म० शेक्ष्यसि । शेक्ष्यथः । शेक्ष्यथ ॥ उ० शेक्ष्यामि । शेक्ष्यावः । शेक्ष्यामः 8. आशी० । प्र० शिष्यात् । शिष्यास्ताम् । शिष्यासुः ॥ म० शिष्याः । शिष्यास्तम् । शिष्यास्त ॥ उ० शिष्यासम् । शिष्यास्व । शिष्यास्म ॥ 9. लुङ् । II. प्र० अशिषत् । अशिषताम् । अशिषन् ॥ म० अशिषः । अशिषतम् । अशिषत ॥ उ० अशिषम् । अशिषाव । अशिषाम ॥ 10. लृङ् । प्र० अशेक्ष्यत् । अशेक्ष्यताम् । अशेक्ष्यन् ॥ म० अशेक्ष्यः । अशेक्ष्यतम् । अशेक्ष्यत ॥ उ० अशेक्ष्यम् । अशेक्ष्याव । अशेक्ष्याम ॥

[३२६] पिषॢ = संचूर्णने । सक० । अनि० । पर० । to grind; to hurt. शिषॢ (३२५) धातुवत् ॥

[३२७] भञ्जो (भञ्ज्) आमर्दने । सक० । अनि० । पर० । to split; to break; to disappoint.

1. लट् । प्र० भनक्ति । भङ्क्तः । भञ्जन्ति ॥ म० भनक्षि । भङ्क्थः । भङ्क्थ ॥ उ० भनज्मि । भञ्ज्वः ।

भञ्ज्मः ॥ 2. लोट् । प्र० भनक्तु--भङ्क्तात् । भङ्क्ताम् । भञ्जन्तु ॥ म० भङ्ग्धि--भङ्क्तात् । भङ्क्तम् । भङ्क्त ॥ उ० भनजानि । भनजाव । भनजाम ॥ 3. लङ् । प्र० अभनक्--ग् । अभङ्क्ताम् । अभञ्जन् ॥ म० अभनक्--ग् । अभङ्क्तम् । अभङ्क्त ॥ उ० अभनजम् । अभञ्ज्व । अभञ्ज्म ॥ 4. विधि० । प्र० भञ्ज्यात् । भञ्ज्याताम् । भञ्ज्युः ॥ म० भञ्ज्याः । भञ्ज्यातम् । भञ्ज्यात ॥ उ० भञ्ज्याम् । भञ्ज्याव । भञ्ज्याम ॥

5. लिट् । प्र० बभञ्ज । बभञ्जतुः । बभञ्जुः ॥ म० बभञ्जिथ--बभङ्क्थ । बभञ्जथुः । बभञ्ज ॥ उ० बभञ्ज । बभञ्जिव । बभञ्जिम ॥ 6. लुट् । प्र० भङ्क्ता ॥ म० भङ्क्तासि ॥ उ० भङ्क्तास्मि ॥ 7. लृट् । भङ्क्ष्यति ॥ 8. आशी० । भज्यात् । भज्यास्ताम् । भज्यासुः ॥ 9. लुङ् । VI. प्र० अभाङ्क्षीत् । अभाङ्क्ताम् । अभाङ्क्षुः ॥ म० अभाङ्क्षीः । अभाङ्क्तम् । अभाङ्क्त ॥ उ० अभाङ्क्षम् । अभाङ्क्ष्व । अभाङ्क्ष्म ॥ 10. लृङ् । अभङ्क्ष्यत् ॥

[३२८] भुज = पालनाभ्यवहारयोः । सक० । अनिट् । पालनार्थे पर० । अभ्यवहारार्थे आत्म० । to protect; to eat; to consume; to enjoy.

परस्मैपदे—1. लट् । प्र० भुनक्ति । भुङ्क्तः । भुञ्जन्ति ॥ म० भुनक्षि ॥ उ० भुनज्मि । भुंञ्ज्वः । 2. लोट् । प्र० भुनक्तु--भुङ्क्तात् । भुङ्क्ताम् ॥ म० भुङ्ग्धि--भुङ्क्तात् । भुङ्क्तम् ॥ उ० भुनजानि ॥ 3. लङ् । प्र० अभुनक्--ग् । अभुङ्क्ताम् ॥ म० अभुनक्—ग् । अभुङ्क्तम् ॥ उ० अभुनजम् । अभुञ्ज्व । अभुञ्ज्म ॥ 4. विधि० । भुञ्ज्यात् । भुञ्ज्याताम् ॥

5. लिट् । प्र० बुभोज । बुभुजतुः ॥ म० बुभोजिथ । बुभुजथुः । बुभुच ॥ उ० बुभोज । बुभुजिव । बुभुजिम ॥ 6. लुट् । प्र० भोक्ता ॥ म० भोक्तासि ॥ 7. लृट् । भोक्ष्यति ॥ 8. आशी० । भुज्यात् । भुज्यास्ताम् ॥ 9. लुङ् । VI. प्र० अभौक्षीत् । अभौक्ताम् । अभौक्षुः ॥ 10. लृङ् । अभोक्ष्यत् ॥

आत्मनेपदे—1. लट् । भुङ्क्ते । भुञ्जाते । भुञ्जते ॥ 2. लोट् । भुङ्क्ताम् । भुञ्जाताम् । भुञ्जताम् ॥ 3. लङ् । अभुङ्क्त । अभुञ्जाताम् । अभुञ्जत ॥ 4. विधि० । भुञ्जीत । भुञ्जीयाताम् । भुञ्जीरन् ॥

5. लिट् । बुभुजे । बुभुजाते । बुभुजिरे ॥ 6. लुट् । प्र० भोक्ता ॥ म० भोक्तासे ॥ उ० भोक्ताहे ॥ 7. लृट् । भोक्ष्यते ॥ 8. आशी० । भुक्षीष्ट ॥ 9. लुङ् ।

X. अभुक्त। अभुक्षाताम्। अभुक्षत ॥ 10. लृङ्। अभोक्ष्यत ॥

[३२९] हिसि (हिंस्) = हिंसायाम्। सक०। सेट्। पर०। to kill.

1. लट्। प्र० हिनस्ति। हिंस्तः। हिंसन्ति ॥ म० हिनस्सि। हिंस्थः। हिंस्थ ॥ उ० हिनस्मि। हिंस्वः। हिंस्मः ॥ 2. लोट्। प्र० हिनस्तु–हिंस्तात्। हिंस्ताम्। हिंसन्तु ॥ म० हिन्धि–हिंस्तात्। हिंस्तम्। हिंस्त ॥ उ० हिनसानि। हिनसाव। हिनसाम ॥ 3. लङ्। प्र०। अहिनद्–त्। अहिंस्ताम्। अहिंसन् ॥ म० अहिनद्–त्–नः। अहिंस्तम्। अहिंस्त ॥ उ० अहिनसम्। अहिंस्व। अहिंस्म ॥ 4. विधि०। हिंस्यात्। हिंस्याताम्। हिंस्युः ॥

5. लिट्। प्र० जिहिंस। जिहिंसतुः। जिहिंसुः ॥ म० जिहिंसिथ। जिहिंसथुः। जिहिंस ॥ उ० जिहिंस। जिहिंसिव। जिहिंसिम ॥ 6. लुट्। हिंसिता ॥ 7. लृट्। हिंसिष्यति ॥ 8. आशी०। हिंस्यात्। हिंस्यास्ताम्। हिंस्यासुः ॥ 9. लुङ्। VII. प्र० अहिंसीत्। अहिंसिष्टाम्। अहिंसिषुः ॥ म० अहिंसीः। अहिंसिष्टम्। अहिंसिष्ट ॥

उ० अहिंसिषम् । अहिंसिष्व । अहिंसिष्म ॥ 10. लृङ् । अहिंसिष्यत् ॥

[३३०] तृह = हिंसायाम् । सक० । सेट् । पर० । to kill ; to hurt.

1. लट् । प्र० तृणेढि । तृण्ढः । तृंहन्ति ॥ म० तृणेक्षि । तृण्ढः । तृण्ढ ॥ उ० तृणेह्मि । तृंह्वः । तृंह्मः ॥ 2. लोट् । प्र० तृणेढु--तृण्ढात् । तृण्ढाम् । तृंहन्तु ॥ म० तृण्ढि--तृण्ढात् । तृण्ढम् । तृण्ढ ॥ उ० तृणहानि । तृणहाव । तृणहाम ॥ 3. लङ् । प्र० अतृणेट्--ड् । अतृण्ढाम् । अतृंहन् ॥ म० अतृणेट्--ड् । अतृण्ढम् । अतृण्ढ ॥ अतृणहम् । अतृंह्व । अतृंह्म ॥ 4. विधि० । तृंह्यात् । तृंह्यताम् । तृंह्युः ॥

5. लिट् । प्र० ततर्ह । ततृहतुः । ततृहुः ॥ म० ततर्हिथ । ततृहथुः । ततृह ॥ उ० ततर्ह ततृहिव । ततृहिम ॥ 6. लुट् । तर्हिता ॥ 7. लृट् । तर्हिष्यति ॥ 8. आशी० । तृह्यात् । तृह्यास्ताम् ॥ 9. लुङ् । VII. अतर्हीत् । अतर्हिष्टाम् । अतर्हिषुः ॥ 10. लृङ् । अतर्हिष्यत् ॥

[३३१] अञ्जू (अञ्ज्) = व्यक्तिम्रक्षण कान्ति गतिषु । सक० ।

वेट् । पर० । to make clear; to anoint; to decorate; to go.

1. लट् । प्र० अनक्ति । अङ्क्तः । अञ्जन्ति ॥ म० अनक्षि । अङ्क्थः । अङ्क्थ ॥ उ० अनज्मि । अञ्ज्वः । अञ्ज्मः ॥ 2. लोट् । प्र० अनक्तु--अङ्क्तात् । अङ्क्ताम् । अञ्जन्तु ॥ म० अङ्ग्धि--अङ्क्तात् । अङ्क्तम् । अङ्क्त ॥ उ० अनजानि । अनजाव । अनजाम । 3. लङ् । प्र० आनक् । आङ्क्ताम् । आञ्जन् ॥ म० आनक्--ग् । आङ्क्तम् । आङ्क्त ॥ उ० आनजम् । आञ्ज्व । आञ्ज्म ॥ 4. विधि० । अञ्ज्यात् । अञ्ज्याताम् ॥

5. लिट् । प्र० आनञ्ज । आनञ्जतुः । आनञ्जुः ॥ म० आनञ्जिथ--आनङ्क्थ । आनञ्जथुः । आनञ्ज ॥ उ० आनञ्ज । आनञ्जिव--आनञ्ज्व । आनञ्जिम--आनञ्ज्म ॥ 6. लुट् । अञ्जिता--अङ्क्ता ॥ 7. लृट् । अञ्जिष्यति--अङ्क्ष्यति ॥ 8. आशी० । अज्यात् । अज्यास्ताम् ॥ 9. लुङ् । VII. आञ्जीत् । आञ्जिष्टाम् । आञ्जिषुः ॥ 10. लृङ् । आञ्जिष्यत्--आङ्क्ष्यत् ॥

अथात्मनेपदिनः ।

[३३२] खिद = दैन्ये । अक० । अनि० । आत्म० ।

to be distressed; to be displeased; to be offended.

1. लट् । प्र० खिन्ते । खिन्दाते । खिन्दते ॥ म० खिन्त्से । खिन्दाथे । खिन्ध्वे ॥ उ० खिन्दे । खिन्द्वहे । खिन्द्महे ॥ 2. लोट् । प्र० खिन्ताम् । खिन्दाताम् । खिन्दताम् ॥ म० खिन्त्स्व । खिन्दाथाम् । खिन्ध्वम् ॥ उ० खिनदै । खिनदावहै । खिनदामहै ॥ 3. लङ् । प्र० अखिन्त । अखिन्दाताम् । अखिन्दत ॥ म० अखिन्थाः । अखिन्दाथाम् । अखिन्ध्वम् ॥ उ० अखिन्दि । अखिन्द्वहि । अखिन्द्महि ॥ 4. विधि० । खिन्दीत । खिन्दीयाताम् । खिन्दीरन् ॥

5. लिट् । प्र० चिखिदे । चिखिदाते । चिखिदिरे ॥ म० चिखिदिषे । चिखिदाथे । चिखिदिध्वे ॥ उ० चिखिदे । चिखिदिवहे । चिखिदिमहे ॥ 6. लुट् । खेत्ता ॥ 7. लृट् । खेत्स्यते ॥ 8. आशी० । खित्सीष्ट । खित्सीयास्ताम् । खित्सीरन् ॥ 9. लुङ् । X. अखित्त । अखित्साताम् । अखित्सत ॥ 10. लङ् । अखेत्स्यत ॥

[३३३] विद = विचारणे । सक० । अनि० । आत्म० to discuss; to consider. खिद (३३२) धातुवत् ॥

[३३४] ञि इन्धी (इन्ध्) = दीप्तौ । अक० । सेट् । आत्म० ।

to shine; to kindle. सार्वधातुके खिद् (३३२) धातुवत्॥ 3. लङ्। प्र० ऐन्ध। ऐन्धाताम्। ऐन्धत॥ म० ऐन्धाः। ऐन्धाथाम्। ऐन्ध्वम्॥ उ० ऐन्धि। ऐन्ध्वहि। ऐन्ध्महि॥

5. लिट्। प्र० इन्धांचक्रे—इन्धांबभूव--इन्धामास॥ 9. लुङ्। XI. ऐन्धिष्ट। ऐन्धिषाताम्। ऐन्धिषत॥

अथोभयपदिनः।

[३३५] रुधिर् (रुध्) = आवरणे। द्विक०। अनि०। उभ०। to obstruct; to prevent; to besiege.

परस्मैपदे—1. लट्। प्र० रुणद्धि। रुन्धः। रुन्धन्ति॥ म० रुणत्सि। रुन्धः। रुन्ध। उ० रुणध्मि। रुन्ध्वः। रुन्ध्मः॥ 2. लोट्। प्र० रुणद्धु--रुन्धात्। रुन्धाम्। रुन्धन्तु॥ म० रुन्धि—रुन्धात्। रुन्धम्। रुन्ध॥ उ० रुणधानि। रुणधाव। रुणधाम॥ 3. लङ्। प्र० अरुणत्—द्। अरुन्धाम्। अरुन्धन्॥ म० अरुणः--त्—द्। अरुन्धम्। अरुन्ध॥ उ० अरुणधम्। अरुन्ध्व। अरुन्ध्म॥ 4. विधि०। प्र० रुन्ध्यात्। रुन्ध्याताम्। रुन्ध्युः॥ म० रुन्ध्याः। रुन्ध्यातम्। रुन्ध्यात॥ उ० रुन्ध्याम्। रुन्ध्याव। रुन्ध्याम॥

5. लिट्। प्र० रुरोध। रुरुधतुः। रुरुधुः॥ म०

ररोधिथ । रुरुधथुः । रुरुध ॥ उ० रुरोध । रुरुधिव । रुरुधिम ॥ 6. लुट् । रोद्धा ॥ 7. लृट् । रोत्स्यति ॥ 8. आशी० । रुध्यात् । रुध्यास्ताम् । रुध्यासुः ॥ 9. लुङ् । II. प्र० अरुधत् । अरुधताम् । अरुधन् ॥ म० अरुधः । अरुधतम् । अरुधत ॥ उ० अरुधम् । अरुधाव । अरुधाम ॥ पक्षे--VI. प्र० अरौत्सीत् । अरौद्धाम् । अरौत्सुः ॥ म० अरौत्सीः । अरौद्धम् । अरौद्ध ॥ उ० अरौत्सम् । अरौत्स्व । अरौत्स्म ॥ 10. लृङ् । अरोत्स्यत् ॥

आत्मनेपदे—1. लट् । प्र० रुन्धे । रुन्धाते । रुन्धते ॥ म० रुन्त्से । रुन्धाथे । रुन्ध्वे ॥ उ० रुन्धे । रुन्ध्वहे । रुन्ध्महे ॥ 2. लोट् । प्र० रुन्धाम् । रुन्धाताम् । रुन्धताम् ॥ म० रुन्त्स्व । रुन्धाथाम् । रुन्ध्वम् ॥ उ० रुणधै । रुणधावहै । रुणधामहै ॥ 3. लङ् । प्र० अरुन्ध । अरुन्धाताम् । अरुन्धत ॥ म० अरुन्धाः । अरुन्धाथाम् । अरुन्ध्वम् ॥ उ० अरुन्धि । अरुन्ध्वहि । अरुन्ध्महि ॥ 4. विधि० । प्र० रुन्धीत । रुन्धीयाताम् । रुन्धीरन् ॥ म० रुन्धीथाः । रुन्धीयाथाम् । रुन्धीध्वम् ॥ उ० रुन्धीय । रुन्धीवहि । रुन्धीमहि ॥

5. लिट् । प्र० रुरुधे । रुरुधाते । रुरुधिरे ॥ म० रुरुधिषे । रुरुधाथे । रुरुधिध्वे ॥ उ० रुरुधे । रुरुधिवहे ।

रुरुधिमहे ॥ 6. लुट् । प्र० रोद्धा ॥ म० रोद्धासे ॥ उ० रोद्धाहे ॥ 7. लृट् । रोत्स्यते ॥ 8. आशी० । प्र० रुत्सीष्ट । रुत्सीयास्ताम् । रुत्सीरन् ॥ म० रुत्सीष्ठाः । रुत्सीयास्थाम् । रुत्सीध्वम् ॥ उ० रुत्सीय । रुत्सीवहि । रुत्सीमहि ॥ 9. लुङ् । X. प्र० अरुद्ध । अरुत्साताम् । अरुत्सत ॥ म० अरुद्धाः । अरुत्साथाम् । अरुद्ध्वम् ॥ उ० अरुत्सि । अरुत्स्वहि । अरुत्स्महि ॥ 10. लृङ् । प्र० अरोत्स्यत ॥ म० अरोत्स्यथाः । उ० अरोत्स्ये । अरोत्स्यावहि ॥

[३३६] भिदिर् (भिद्) = विदारणे । सक० । अनि० । उभ० । to separate; to split; to break.

परस्मैपदे—1. लट् । प्र० भिनत्ति । भिन्तः । भिन्दन्ति ॥ म० भिनत्सि । भिन्थः । भिन्थ ॥ उ० भिनद्मि । भिन्द्वः । भिन्द्मः ॥ 2. लोट् । प्र० भिनत्तु–भिन्तात् । भिन्ताम् । भिन्दन्तु ॥ म० भिन्धि–भिन्तात् । भिन्तम् । भिन्त ॥ उ० भिनदानि । भिनदाव । भिनदाम ॥ 3. लङ् । प्र० अभिनत्–द् । अभिन्ताम् । अभिन्दन् ॥ म० अभिनः–अभिनत्–द् । अभिन्तम् । अभिन्त ॥ उ० अभिनदम् । अभिन्द्व । अभिन्द्म ॥ 4. विधि० । भिन्द्यात् । भिन्द्याताम् । भिन्द्युः ॥

5. लिट् । प्र० बिभेद । बिभिदतुः । बिभिदुः ॥ म० बिभेदिथ । बिभिदथुः । बिभिद ॥ उ० बिभेद । बिभिदिव । बिभिदिम ॥ 6. लुट् । भेत्ता ॥ 7. लृट् । भेत्स्यति ॥ 8. आशी० । भिद्यात् । भिद्यास्ताम् ॥ 9. लुङ् । II. अभिदत् । अभिदताम् ॥ पक्षे—VI. अभैत्सीत् । अभैत्ताम् । अभैत्सुः ॥ 10. लृङ् । अभेत्स्यत् ॥

आत्मनेपदे—1. लट् । भिन्ते ॥ 2. लोट् । प्र० भिन्ताम् । भिन्दाताम् । भिन्दताम् ॥ म० भिन्त्स्व ॥ उ० भिनदै ॥ 3. लङ् । अभिन्त । अभिन्दाताम् । अभिन्दत ॥ 4. विधि० । भिन्दीत । भिन्दीयाताम् । भिन्दीरन् ॥

5. लिट् । प्र० बिभिदे । बिभिदाते । बिभिदिरे ॥ म० बिभिदिषे । बिभिदाथे । बिभिदिध्वे ॥ उ० बिभिदे । बिभिदिवहे । बिभिदिमहे ॥ 6. लुट् । प्र० भेत्ता ॥ म० प्र० भेत्तासे ॥ उ० भेत्ताहे ॥ 7. लृट् । भेत्स्यते ॥ 8. आशी० । भित्सीष्ट । भित्सीयास्ताम् । भित्सीरन् ॥ म० भित्सीष्ठाः ॥ उ० भित्सीय ॥ 9. लुङ् । X. अभित्त । अभित्साताम् । अभित्सत ॥ 10. लृङ् । अभेत्स्यत ॥

[३३७] युजिर् (युज्) = योगे । सक० । अनि० । उभ० । to unite; to put; to prepare.

परस्मैपदे—1. लट् । प्र० युनक्ति । युङ्क्तः ।

युञ्जन्ति ॥ म० युनक्षि । युङ्क्थः । युङ्क्थ ॥ उ० युनज्मि । युञ्ज्वः । युञ्ज्मः ॥ 2. लोट् । प्र० युनक्तु–युङ्क्तात् । युङ्क्ताम् । युञ्जन्तु ॥ म० युङ्ग्धि–युङ्क्तात् । युङ्क्तम् । युङ्क्त ॥ उ० युनजानि । युनजाव । युनजाम ॥ 3. लङ् । प्र० अयुनक्–ग् । अयुङ्क्ताम् । अयुञ्जन् ॥ म० अयुनक्–ग् अयुङ्क्तम् । अयुङ्क्त ॥ उ० अयुनजम् । अयुञ्ज्व । अयुञ्ज्म ॥ 4. विधि० । प्र० युञ्ज्यात् । युञ्ज्याताम् । युञ्ज्युः ॥ म० युञ्ज्याः । युञ्ज्यातम् । युञ्ज्यात ॥ उ० युञ्ज्याम् । युञ्ज्याव । युञ्ज्याम ॥

5. लिट् । प्र० युयोज । युयुजतुः । युयुजुः ॥ म० युयोजिथ । युयुजथुः । युयुज ॥ उ० युयोज । युयुजिव । युयुजिम ॥ 6. लुट् । योक्ता ॥ 7. लृट् । योक्ष्यति ॥ 8. आशी० । युज्यात् । युज्यास्ताम् ॥ 9. लुङ् । II. अयुजत् । अयुजताम् । अयुजन् ॥ पक्षे–VI. अयौक्षीत् । अयौक्ताम् । अयौक्षुः ॥ 10. लृङ् । अयोक्ष्यत् ॥

आत्मनेपदे—1. लट् । प्र० युङ्क्ते । युञ्जाते । युञ्जते ॥ म० युङ्क्षे । युञ्जाथे । युङ्ग्ध्वे ॥ उ० युञ्जे । युञ्ज्वहे । युञ्ज्महे ॥ 2. लोट् । प्र० युङ्क्ताम् । युञ्जाताम् । युञ्जताम् ॥ म० युङ्क्ष्व । युञ्जाथाम् । युङ्ग्ध्वम् ॥ उ० युनजै । युनजावहै । युनजामहै ॥ 3. लङ् । प्र०

अयुङ्क्त । अयुञ्जाताम् । अयुञ्जत ॥ म० अयुङ्क्थाः । अयुञ्जाथाम् । अयुङ्ग्ध्वम् ॥ उ० अयुञ्जि । अयुञ्ज्वहि । अयुञ्ज्महि ॥ 4. विधि० । युञ्जीत । युञ्जीयाताम् । युञ्जीरन् ॥

5. लिट् । प्र० युयुजे । युयुजाते । युयुजिरे ॥ म० युयुजिषे । युयुजाथे । युयुजिध्वे ॥ उ० युयुजे । युयुजिवहे । युयुजिमहे ॥ 6. लुट् । योक्ता ॥ 7. लृट् । योक्ष्यते ॥ 8. आशी० । युक्षीष्ट ॥ 9. लुङ् । X. अयुक्त । अयुक्षाताम् । अयुक्षत ॥ 10. लृङ् । अयोक्ष्यत ॥

[३३८] क्षुदिर् = संपेषणे । सक० । सेट् । उभ० । to pound; to strike against. युजिर् (३३७) धातुवत् ॥

1. लट् । क्षुणत्ति ॥ 2. लोट् । क्षुणत्तु ॥ 3. लङ् । प्र० अक्षुणत्–द् ॥ म० अक्षुणः—त्--द् ॥ 4. विधि० । क्षुन्द्यात् । क्षुन्द्याताम् ॥

5. लिट् । प्र० चुक्षोद । चुक्षुदतुः । चुक्षुदुः ॥ म० चुक्षोदिथ । चुक्षुदथुः । चुक्षुद ॥ उ० चुक्षोद । चुक्षुदिव । चुक्षुदिम ॥ 6. लुट् । क्षोत्ता ॥ 7. लृट् । क्षोत्स्यति ॥ 8. आशी० । क्षुद्यात् । क्षुद्यास्ताम् ॥ 9. लुङ् । II. अक्षुदत् ॥ पक्षे–X. अक्षौत्सीत् ॥ 10. लृङ् । अक्षोत्स्यत् ॥

आत्मनेपदे—1. लट् । प्र० क्षुन्ते । क्षुन्दाते ।

क्षुन्दते ॥ म० क्षुन्त्से । क्षुन्दाथे । क्षुन्ध्वे ॥ उ० क्षुन्दे । क्षुन्द्वहे । क्षुन्द्महे ॥ 2. लोट् । प्र० क्षुन्ताम् । क्षुन्दाताम् । क्षुन्दताम् ॥ म० क्षुन्त्स्व । क्षुन्दाथाम् । क्षुन्ध्वम् ॥ उ० क्षुणदै । क्षुणदावहै । क्षुणदामहै ॥ 3. लङ् । प्र० अक्षुन्त ॥ म० अक्षुन्थाः ॥ उ० अक्षुन्दि ॥ 4. विधि० । क्षुन्दीत । क्षुन्दीयाताम् ॥

5. लिट् । प्र० चुक्षुदे । चुक्षुदाते । चक्षुदिरे ॥ म० चुक्षुदिषे । चुक्षुदाथे । चुक्षुदिध्वे ॥ उ० चुक्षुदे । चुक्षुदिवहे । चुक्षुदिमहे ॥ 6. लुट् । क्षोत्ता ॥ 7. लृट् । क्षोत्स्यते ॥ 8. आशी० । क्षुत्सीष्ट । क्षुत्सीयास्ताम् ॥ 9. लुङ् । X. अक्षुत्त । अक्षुत्साताम् ॥ 10. लृङ् । अक्षोत्स्यत ॥

इति रुधादयः ॥ ७ ॥

श्रीहयग्रीवाय नमः ॥

मध्यमधातुरूपावल्याम् ।

तनादयः ॥ ८ ॥

तत्र उभयपदिनः ।

[३३९] तनु (तन्) = विस्तारे । सक० । सेट् । उभ० । to spread.

परस्मैपदे–1. **लट्** । **प्र०** तनोति । तनुतः । तन्वन्ति ॥ **म०** तनोषि । तनुथः । तनुथ । **उ०** तनोमि । तनुवः--तन्वः । तनुमः--तन्मः ॥ 2. **लोट्** । **प्र०** तनोतु--तनुतात् । तनुताम् । तन्वन्तु ॥ **म०** तनु--तनुतात् । तनुतम् । तनुत । **उ०** तनवानि । तनवाव । तनवाम ॥ 3. **लङ्** । **प्र०** अतनोत् । अतनुताम् । अतन्वन् ॥ **म०** अतनोः । अतनुतम् । अतनुत ॥ **उ०** अतनवम् । अतनुव--अतन्व । अतनुम--अतन्म ॥ 4. **विधि०** । **प्र०** तनुयात् । तनुयाताम् । तनुयुः ॥ **म०** तनुयाः । तनुयातम् । तनुयात ॥ **उ०** तनुयाम् । तनुयाव । तनुयाम ॥

5. **लिट्** । **प्र०** ततान । तेनतुः । तेनुः ॥ **म०** तेनिथ । तेनथुः । तेन ॥ **उ०** ततान--ततन । तेनिव । तेनिम ॥

6. लुट् । तनिता ॥ 7. लृट् । तनिष्यति ॥ 8. आशी० । प्र० तन्यात् । तन्यास्ताम् । तन्यासुः ॥ म० तन्याः । तन्यास्तम् । तन्यास्त ॥ उ० तन्यासम् । तन्यास्व । तन्यास्म ॥ 9. लुङ् । VII. प्र० अतानीत् । अतानिष्टाम् । अतानिषुः ॥ म० अतानीः । अतानिष्टम् । अतानिष्ट ॥ उ० अतानिषम् । अतानिष्व । अतानिष्म ॥ पक्षे-अतनीत् । अतनिष्टाम् । इत्यादि ॥ 10. लृङ् । अतनिष्यत् ॥

आत्मनेपदे—1. लट् । प्र० तनुते । तन्वाते । तन्वते ॥ म० तनुषे । तन्वाथे । तनुध्वे ॥ उ० तन्वे । तनुवहे—तन्वहे । तनुमहे--तन्महे ॥ 2. लोट् । प्र० तनुताम् । तन्वाताम् । तन्वताम् । म० तनुष्व । तन्वाथाम् । तनुध्वम् ॥ उ० तनवै । तनवावहै । तनवामहै ॥ 3. लङ् । प्र० अतनुत । अतन्वाताम् । अतन्वत ॥ म० अतनुथाः । अतन्वाथाम् । अतनुध्वम् ॥ उ० अतन्वि । अतनुवहि—अतन्वहि । अतनुमहि—अतन्महि ॥ 4. विधि० । प्र० तन्वीत । तन्वीयाताम् । तन्वीरन् ॥ म० तन्वीथाः । तन्वीयाथाम् । तन्वीध्वम् ॥ उ० तन्वीय । तन्वीवहि । तन्वीमहि ॥

5. लिट् । प्र० तेने । तेनाते । तेनिरे ॥ म० तेनिषे । तेनाथे । तेनिध्वे ॥ उ० तेने । तेनिवहे । तेनिमहे ॥ 6. लुट् । प्र० तनिता । म० तनितासे ॥ उ० तनिताहे ।

तनितास्वहे ॥ 7. लृट् । तनिष्यते ॥ 8. आशी० । प्र० तनिषीष्ट । तनिषीयास्ताम् । तनिषीरन् ॥ म० तनिषीष्ठाः । तनिषीयास्थाम् । तनिषीध्वम् ॥ उ० तनिषीय । तनिषीवहि । तनिषीमहि ॥ 9. लुङ् । XI. प्र० अतत--अतनिष्ट । अतनिषाताम् । अतनिषत ॥ म० अतथाः--अतनिष्ठाः । अतनिषाथाम् । अतनिध्वम्--ढ्वम् ॥ उ० अतनिषि । अतनिष्वहि । अतनिष्महि ॥ 10. लृङ् । प्र० अतनिष्यत ॥ म० अतनिष्यथाः ॥ उ० अतनिष्ये । अतनिष्यावहि ॥

[३४०] षणु (सन्) = दाने । सक० । सेट् । उभ० । to give; to worship. तनु (३३९) धातुवत् । सनोति--सनुते ॥ 8. आशी० । परस्मैपदे—सायात्–सन्यात् । सायास्ताम्–सन्यास्ताम् ॥ आत्मनेपदे—सनिषीष्ट । सनिषीयास्ताम् । 9. लुङ् । परस्मैपदे—VII. असानीत्--असनीत् । असानिष्टाम्--असनिष्टाम् ॥ आत्मनेपदे—प्र० असात--असनिष्ट । असनिषाताम् ॥ म० असाथाः--असनिष्ठाः । असनिषाथाम् ॥ 10. लृङ् । असनिष्यत्--त ॥

[३४१] क्षिणु (क्षिण्) = हिंसायाम् । सक० । सेट् । उभ० । to kill.

परस्मैपदे—1. लट् । प्र० क्षिणोति--क्षेणोति ॥ म० क्षिणोषि--क्षेणोषि । उ० क्षिणोमि--क्षेणोमि ॥ 2. लोट् ।

प्र० क्षिणोतु–क्षेणोतु--क्षिणुतात्--क्षेणुतात् ॥ म० क्षिणु–क्षेणु ॥ उ० क्षिणवानि--क्षेणवानि ॥ 3. लङ् । प्र० अक्षिणोत्--अक्षेणोत् ॥ म० अक्षिणोः--अक्षेणोः ॥ उ० अक्षिणवम्--अक्षेणवम् । अक्षिणुव--अक्षिण्व--अक्षेणुव अक्षेण्व । अक्षिणुम--अक्षेणुम--अक्षिण्म--अक्षेण्म ॥ 4. विधि० । क्षिणुयात्--क्षेणुयात् ॥

5. लिट् । प्र० चिक्षेण । चिक्षिणतुः । चिक्षिणुः ॥ म० चिक्षेणिथ । चिक्षिणथुः । चिक्षिण ॥ उ० चिक्षेण । चिक्षिणिव । चिक्षिणिम ॥ 6. लुट् । क्षेणिता ॥ 7. लृट् । क्षेणिष्यति ॥ 8. आशी० । क्षिण्यात् ॥ 9. लुङ् । VII. अक्षेणीत् । अक्षेणिष्टाम् ॥ 10. लृङ् । अक्षेणिष्यत् ॥

आत्मनेपदे—1. लट् । प्र० क्षिणुते--क्षेणुते । क्षिण्वाते-क्षेण्वाते । क्षिण्वते--क्षेण्वते ॥ म० क्षिणुषे--क्षेणुषे । क्षिण्वाथे--क्षेण्वाथे । क्षिणुध्वे--क्षेणुध्वे ॥ उ० क्षिण्वे--क्षेण्वे । क्षिणुवहे--क्षेणुवहे--क्षिण्वहे--क्षेण्वहे । क्षिणुमहे--क्षेणुमहे--क्षिण्महे--क्षेण्महे॥ 2. लोट् । प्र० क्षिणुताम्--क्षेणुताम् ॥ म० क्षिणुष्व--क्षेणुष्व ॥ उ० क्षिणवै क्षेणवै ॥ 3. लङ् । अक्षिणुत--अक्षेणुत ॥ 4. विधि० । क्षिण्वीत--क्षेण्वीत ॥

5. लिट् । प्र० चिक्षिणे ॥ म० चिक्षिणिषे ॥ उ० चिक्षिणे । चिक्षिणिवहे ॥ 6. लुट् । प्र० क्षेणिता ॥

म० क्षेणितासे ॥ 7. ऌट् । क्षेणिष्यते ॥ 8. आशी० । क्षेणिषीष्ट ॥ 9. लुङ् । XI. प्र० अक्षित--अक्षेणिष्ट । अक्षेणिषाताम् । अक्षेणिषत ॥ म० अक्षिथाः--अक्षेणिष्ठाः । अक्षेणिषाथाम् । अक्षेणिध्वम्--ढ्वम् ॥ उ० अक्षेणिषि । अक्षेणिष्वहि । अक्षेणिष्महि ॥ 10. ऌङ् । अक्षेणिष्यत ॥

[३४२] डुकृञ् (कृ) = करणे । सक० । अनि० । उभ० । to do ; to make.

परस्मैपदे—1. लट् । प्र० करोति । कुरुतः । कुर्वन्ति ॥ म० करोषि । कुरुथः । कुरुथ ॥ उ० करोमि । कुर्वः । कुर्मः ॥ 2. लोट् । प्र० करोतु--कुरुतात् । कुरुताम् । कुर्वन्तु ॥ म० कुरु--कुरुतात् । कुरुतम् । कुरुत ॥ उ० करवाणि । करवाव । करवाम ॥ 3. लङ् । प्र० अकरोत् । अकुरुताम् । अकुर्वन् ॥ म० अकरोः । अकुरुतम् । अकुरुत ॥ उ० अकरवम् । अकुर्व । अकुर्म ॥ 4. विधि० । प्र० कुर्यात् । कुर्याताम् । कुर्युः । म० कुर्याः । कुर्यातम् । कुर्यात ॥ उ० कुर्याम् । कुर्याव । कुर्याम ॥

5. लिट् । प्र० चकार । चक्रतुः । चक्रुः ॥ म० चकर्थ । चक्रथुः । चक्र ॥ उ० चकार--चकर । चकृव । चकृम ॥ 6. लुट् । प्र० कर्ता ॥ म० कर्तासि ॥ उ० कर्तास्मि ॥ 7. ऌट् । करिष्यति ॥ 8. आशी० ।

प्र० क्रियात्। क्रियास्ताम्। क्रियासुः॥ म० क्रियाः। क्रियास्तम्। क्रियास्त॥ उ० क्रियासम्। क्रियास्व। क्रियास्म॥ 9. लुङ्। VI. प्र० अकार्षीत्। अकार्ष्टाम्। अकार्षुः॥ म० अकार्षीः। अकार्ष्टम्। अकार्ष्ट॥ उ० अकार्षम्। अकार्ष्व। अकार्ष्म॥ 10. लृङ्। अकरिष्यत्॥

आत्मनेपदे—1. लट्। प्र० कुरुते। कुर्वाते। कुर्वते॥ म० कुरुषे। कुर्वाथे। कुरुध्वे॥ उ० कुर्वे। कुर्वहे। कुर्महे॥ 2. लोट्। प्र० कुरुताम्। कुर्वाताम्। कुर्वताम्॥ म० कुरुष्व। कुर्वाथाम्। कुरुध्वम्॥ उ० करवै। करवावहै। करवामहै॥ 3. लङ्। प्र० अकुरुत। अकुर्वाताम्। अकुर्वत॥ म० अकुरुथाः। अकुर्वाथाम्। अकुरुध्वम्॥ उ० अकुर्वि। अकुर्वहि। अकुर्महि॥ 4. विधि०। प्र० कुर्वीत। कुर्वीयाताम्। कुर्वीरन्॥ म० कुर्वीथाः। कुर्वीयाथाम्। कुर्वीध्वम्॥ उ० कुर्वीय। कुर्वीवहि। कुर्वीमहि॥

5. लिट्। प्र० चक्रे। चक्राते। चक्रिरे॥ म० चकृषे। चक्राथे। चकृढ्वे॥ उ० चक्रे। चकृवहे। चकृमहे॥ 6. लुट्। प्र० कर्ता॥ म० कर्तासि॥ उ० कर्ताहे॥ 7. लृट्। करिष्यते॥ 8. आशी०। प्र० कृषीष्ट। कृषीयास्ताम्।

कृषीरन् ॥ म० कृषीष्ठाः । कृषीयास्थाम् । कृषीढ्वम् ॥ उ० कृषीय । कृषीवहि । कृषीमहि ॥ 9. लुङ् । X. प्र० अकृत । अकृषाताम् । अकृषत ॥ म० अकृथाः । अकृषाथाम् । अकृढ्वम् ॥ उ० अकृषि । अकृष्वहि । अकृष्महि ॥ 10 लृङ् । अकरिष्यत ॥

[३४३] वनु (वन्) = याचने । सक० । सेट् । आत्म० । केचिदमुं परस्मैपदिनमाहुः । to beg; to seek for. तनु (३३९) धातुवत् ॥

आत्मनेपदे—1. लट् । वनुते ॥ 2. लोट् । वनुताम् ॥ 3. लङ् । अवनुत ॥ 4. विधि० । वन्वीत ॥

5. लिट् । ववनेववनाते । ववनिरे ॥ 9. लुङ् । अवत--अवनिष्ट ॥

परस्मैपदे—1. लट् । वनोति ॥ 5. लिट् । ववान । ववनतुः । ववनुः । 9. लुङ् । VII. अवानीत्--अवनीत् ॥

[३४४] मनु (मन्) = अवबोधने । सक० । सेट् । आत्म० । to consider; to esteem. तनु (३३९) धातोरात्मनेपदवत् । 1. लट् । मनुते ॥ 5. लिट् । मेने । मेनाते ॥ इत्यादि ॥

इति तनादयः ॥ ८ ॥

मङ्गलदेवतायै नमः ।

मध्यमधातुरूपावल्याम् ।

क्र्यादयः ॥ ९ ॥

तत्र परस्मैपदिनः ।

[३४५] पॄ = पालनपूरणयोः । सक० । सेट् । पर० । to protect ; to fill.

1. लट् । प्र० पृणाति । पृणीतः । पृणन्ति ॥ म० पृणासि । पृणीथः । पृणीथ ॥ उ० पृणामि । पृणीवः । पृणीमः ॥ 2. लोट् । प्र० पृणातु--पृणीतात् । पृणीताम् । पृणन्तु ॥ म० पृणीहि--पृणीतात् । पृणीतम् । पृणीत ॥ उ० पृणानि । पृणाव । पृणाम ॥ 3. लङ् । प्र० अपृणात् । अपृणीताम् । अपृणन् ॥ म० अपृणाः । अपृणीतम् । अपृणीत । उ० अपृणाम् । अपृणीव । अपृणीम ॥ 4. विधि० । प्र० पृणीयात् । पृणीयाताम् । पृणीयुः ॥ म० पृणीयाः । पृणीयातम् । पृणीयात ॥ उ० पृणीयाम् । पृणीयाव । पृणीयाम ॥

5. लिट् । प्र० पपार । पप्रतुः—पपरतुः । पप्रुः--पपरुः ॥ म० पपरिथ । पप्रथुः--पपरथुः । पप्र--पपर ॥ उ० पपार--पपर । पप्रिव--पपरिव । पप्रिम--पपरिम ॥ 6. लुट् । परिता--परीता ॥ म० परितासि--परीतासि ॥ उ० परितास्मि--परीतास्मि ॥ 7. लृट् । परिष्यति--परीष्यति ॥ 8. आशी० । पूर्यात् । पूर्यास्ताम् । पूर्यासुः ॥ 9. लुङ् । VII. प्र० अपारीत् । अपारिष्टाम् । अपारिषुः ॥ म० अपारीः । अपारिष्टम् । अपारिष्ट ॥ उ० अपारिषम् । अपारिष्व । अपारिष्म ॥ 10. लृङ् । अपरिष्यत्--अपरीष्यत ॥

[३४६] गॄ = शब्दे । अक० । सेट् । पर० । to sound; to speak; to praise. पॄ (३४५) धातुवत् । 1. लट् । गृणाति ॥ 5. लिट् । जगार । जगरतुः ॥ 9. लुङ् । VII. अगारीत् ॥

[३४७] दॄ = विदारणे । सक० । सेट् । पर० । to bar; to split. पॄ (३४५) धातुवत् ॥ 1. लट् । दृणाति ॥ 5. लिट् । ददार । दद्रतुः--ददरतुः ॥

[३४८] कॄ = हिंसायाम् । सक० । सेट् । पर० । to injure; to kill. पॄ (३४५) धातुवत् ॥

[३४९] अश = भोजने । सक० । सेट् । पर० । to eat.

1. लट् । ० अश्नाति । अश्नीतः । अश्नन्ति ॥ म० अश्नासि । अश्नीथः । अश्नीथ ॥ उ० अश्नामि । अश्नीवः । अश्नीमः ॥ 2. लोट् । प्र० अश्नातु--अश्नीतात् ॥ म० अशान--अश्नीतात् ॥ उ० अश्नानि ॥ 3. लङ् । आश्नात् ॥ 4. विधि० । अश्नीयात् ॥

5. लिट् । प्र० आश । आशतुः । आशुः ॥ 9. लुङ् । VII. आशीत् । आशिष्टाम् । आशिषुः ॥

[३५०] पुष = पुष्टौ । सक० । सेट् । पर० । to nourish.

1. लट् । पुष्णाति ॥ 2. लोट् । प्र० पुष्णातु ॥ म० पुषाण ॥ उ० पुष्णानि ॥ 3. लङ् । अपुष्णात् । अपुष्णीताम् । अपुष्णन् ॥ 4. विधि० । पुष्णीयात् । पुष्णीयाताम् ॥

5. लिट् । पुपोष । पुपुषतुः । पुपुषुः ॥ 9. लुङ् । VII. अपोषीत् । अपोषिष्टाम् । अपोषिषुः ॥

[३५१] मुष = स्तेये । सक० । सेट् । पर० । to steal. पुष (३५०) धातुवत् ॥

[३५२] क्षुभ = संचलने । अक० । सेट् । पर० । to be agitated ; to disturb. पुष (३५०) धातुवत् ॥

[३५३] क्लिशू (क्लिश्) = विबाधने । सक० । वेट् । पर० । to torment ; to distress.

1. लट् । क्लिश्नाति ॥ 2. लोट् । प्र० क्लिश्नातु । म० क्लिशान ॥ उ० क्लिश्नानि ॥ 3. लङ् । अक्लिश्नात् ॥ 4. विधि० । क्लिश्नीयात् ॥

5. लिट् । प्र० चिक्लेश । चिक्लिशितुः । चिक्लिशुः ॥ म० चिक्लेशिथ--चिक्लेष्ठ । चिक्लिशथुः । चिक्लिश ॥ उ० चिक्लेश । चिक्लिशिव--चिक्लिश्व । चिक्लिशिम-श्म ॥ 6. लुट् । क्लेशिता । क्लेष्टा ॥ 7. लृट् । क्लेशिष्यति--क्लेक्ष्यति ॥ 8. आशी० । क्लिश्यात् । क्लिश्यास्ताम् ॥ 9. लुङ् । VII. अक्लेशीत् । अक्लेशिष्टाम् । अक्लेशिषुः ॥ अनिट्पक्षे—V. अक्लिक्षत् । अक्लिक्षताम् । अक्लिक्षन् ॥ 10. लृङ् । अक्लेशिष्यत्--अक्लेक्ष्यत् ॥

[३५४] मृद = क्षोदे । सक० । सेट् । पर० । to press; to rub off.

1. लट् । मृद्नाति ॥ 2. लोट् । प्र० मृद्नातु ॥ म० मृदान ॥ 3. लङ् । अमृद्नात् । अमृद्नीताम् ॥ 4. विधि० । मृद्नीयात् । मृद्नीयाताम् । मृद्नीयुः ॥

5. लिट् । ममर्द । ममृदतुः ॥ 6. लुट् । मर्दिता ॥ 7. लृट् । मर्दिष्यति ॥ 8. आशी० । मृद्यात् । मृद्यास्ताम् ॥ 9. लुङ् । VII. अमर्दीत् । अमर्दिष्टाम् । अमर्दिषुः ॥ 10. लृङ् । अमर्दिष्यत ॥

[३५५] मन्थ = विलोडने । द्विक० । सेट् । पर० । to churn; to agitate.

1. लट् । मथ्नाति ॥ 2. लोट् । प्र० मथ्नातु ॥ म० मथान ॥ 3. लङ् । प्र० अमथ्नात् । अमथ्नीताम् । अमथ्नन् ॥ 4. विधि० । मथ्नीयात् । मथ्नीयाताम् ॥

5. लिट् । प्र० ममन्थ । ममन्थतुः । ममन्थुः ॥ म० ममन्थिथ । ममन्थथुः । ममन्थ ॥ उ० ममन्थ । ममन्थिव । ममन्थिम ॥ 6. लुट् । मन्थिता ॥ 7. लृट् । मन्थिष्यति ॥ 8. आशी० । मथ्यात् । मथ्यास्ताम् ॥ 9. लुङ् । VII. अमन्थीत् । अमन्थिष्टाम् । अमन्थिषुः ॥ 10. लृङ् । अमन्थिष्यत् ॥

[३५६] ग्रन्थ = संदर्भे । सक० । सेट् । पर० । to put together; to fasten. मन्थ (३५५) धातुवत् । जग्रन्थ ॥

[३५७] श्रन्थ = संदर्भे । मन्थ (३५५) धातुवत् । शश्रन्थ ॥

[३५८] ज्ञा = अवबोधने । सक० । अनि० । पर० । to know.

1. लट् । प्र० जानाति । जानीतः । जानन्ति । म० जानासि । जानीथः । जानीथ ॥ उ० जानामि । जानीवः । जानीमः ॥ 2. लोट् । प्र० जानातु--जानीतात् । जानीताम् । जानन्तु ॥ म० जानीहि--जानीतात् । जानीतम् । जानीत ॥

उ० जानानि । जानाव । जानाम ॥ 3. लङ् । प्र० अजानात् । अजानीताम् । अजानन् ॥ म० अजानाः । अजानीतम् । अजानीत ॥ उ० अजानाम् । अजानीव । अजानीम ॥ 4. विधि० । प्र० जानीयात् । जानीयाताम् ॥ म० जानीयाः ॥ उ० जानीयाम् ॥

5. लिट् । प्र० जज्ञौ । जज्ञतुः । जज्ञुः ॥ म० जज्ञिथ—जज्ञाथ । जज्ञथुः । जज्ञ ॥ उ० जज्ञौ । जज्ञिव । जज्ञिम ॥ 6. लुट् । ज्ञाता ॥ 7. लृट् । ज्ञास्यति ॥ 8. आशी० । ज्ञायात् । ज्ञायास्ताम् । ज्ञायासुः ॥ पक्षे—ज्ञेयात् । ज्ञेयास्ताम् । ज्ञेयासुः ॥ 9. लुङ् । IV. प्र० अज्ञासीत् । अज्ञासिष्टाम् । अज्ञासिषुः ॥ म० अज्ञासीः । आज्ञासिष्टम् । अज्ञासिष्ट ॥ उ० अज्ञासिषम् । अज्ञासिष्व । अज्ञासिष्म ॥ 10. लृङ् । अज्ञास्यत् ॥

[३५९] वॄ = वरणे । सक० । सेट् । पर० । to choose. पॄ (३४५) धातुवत् ॥ 5. लिट् । ववार । ववरतुः । ववरुः ॥

अथोभयपदिनः ।

[३६०] डु क्रीञ् (क्री) = द्रव्यविनिमये । सक० । अनि० । उभ० । to buy; to purchase.

परस्मैपदे—1. लट् । प्र० क्रीणाति । क्रीणीतः । क्रीणन्ति ॥ म० क्रीणासि । क्रीणीथः । क्रीणीथ ॥ उ० क्रीणामि । क्रीणीवः । क्रीणीमः ॥ 2. लोट् । प्र० क्रीणातु–क्रीणीतात् । क्रीणीताम् । क्रीणन्तु ॥ म० क्रीणीहि–क्रीणीतात् । क्रीणीतम् । क्रीणीत ॥ उ० क्रीणानि । क्रीणाव । क्रीणाम ॥ 3. लङ् । प्र० अक्रीणात् । अक्रीणीताम् । अक्रीणन् ॥ म० अक्रीणाः । अक्रीणीतम् । अक्रीणीत ॥ उ० अक्रीणाम् । अक्रीणीव । अक्रीणीम ॥ 4. विधि० । प्र० क्रीणीयात् । क्रीणीयाताम् । क्रीणीयुः ॥ म० क्रीणीयाः । क्रीणीयातम् । क्रीणीयात ॥ उ० क्रीणीयाम् । क्रीणीयाव । क्रीणीयाम ॥

5. लिट् । प्र० चिक्राय--चिक्रय । चिक्रियतुः । चिक्रियुः ॥ म० चिक्रयिथ–चिक्रेथ । चिक्रियथुः । चिक्रिय ॥ उ० चिक्राय। चिक्रियिव । चिक्रियिम ॥ 6. लुट् । प्र० क्रेता ॥ म० क्रेतासि ॥ उ० क्रेतास्मि ॥ 7. लृट् । क्रेष्यति ॥ 8. आशी० । क्रीयात् । क्रीयास्ताम् । क्रीयासुः ॥ 9. लुङ् । VI. प्र० अक्रैषीत् । अक्रैष्टाम् । अक्रैषुः ॥ म० अक्रैषीः । अक्रैष्टम् । अक्रैष्ट ॥ उ० अक्रैषम् । अक्रैष्व । अक्रैष्म ॥ 10. लृङ् । अक्रेष्यत् ॥

आत्मनेपदे—1. लट् । प्र० क्रीणीते । क्रीणाते ।

क्रीणते ॥ म० क्रीणीषे । क्रीणाथे । क्रीणीध्वे ॥ उ० क्रीणे । क्रीणीवहे । क्रीणीमहे ॥ 2. लोट् । प्र० क्रीणीताम् । क्रीणाताम् । क्रीणताम् ॥ म० क्रीणीष्व । क्रीणाथाम् । क्रीणीध्वम् ॥ उ० क्रीणै । क्रीणावहै । क्रीणामहै ॥ 3. लङ् । प्र० अक्रीणीत । अक्रीणाताम् । अक्रीणत ॥ म० अक्रीणीथाः । अक्रीणाथाम् । अक्रीणीध्वम् ॥ उ० अक्रीणि । अक्रीणीवहि । अक्रीणीमहि ॥ 4. विधि० । प्र० क्रीणीत । क्रीणीयाताम् । क्रीणीरन् ॥ म० क्रीणीथाः । क्रीणीयाथाम् । क्रीणीध्वम् ॥ उ० क्रीणीय । क्रीणीवहि । क्रीणीमहि ॥

5. लिट् । प्र० चिक्रिये । चिक्रियाते ॥ चिक्रियिरे ॥ म० चिक्रियिषे । चिक्रियाथे । चिक्रियिढ्वे–ध्वे ॥ उ० चिक्रिये । चिक्रियिवहे । चिक्रियिमहे ॥ 6. लुट् । प्र० क्रेता ॥ म० क्रेतासे ॥ उ० क्रेताहे ॥ 7. लृट् । क्रेष्यते ॥ 8. आशी० । प्र० क्रेषीष्ट । क्रेषीयास्ताम् । क्रेषीरन् ॥ म० क्रेषीष्ठाः । क्रेषीयास्थाम् । क्रेषीढ्वम् ॥ उ० क्रेषीय । क्रेषीवहि । क्रेषीमहि ॥ 9. लुङ् । X. प्र० अक्रेष्ट । अक्रेषाताम् । अक्रेषत ॥ म० अक्रेष्ठाः । अक्रेषाथाम् । अक्रेढ्वम् ॥ उ० अक्रेषि । अक्रेष्वहि । अक्रेष्महि ॥ 10. लृङ् । अक्रेष्यत ॥

[३६१] **प्रीञ्** (प्री) = तर्पणे कान्तौ च । सक० । अनि० । उभ० । to please; to take delight in; to desire. क्रीञ् (३६०) धातुवत् ॥

[३६२] श्रीञ् (श्री) = पाके । सक० । अनि० । उभ० । to cook; to boil. क्रीञ् (३६०) धातुवत् ॥

[३६३] पूञ् = पवने । सक० । सेट् । उभ० । to purify.

परस्मैपदे—1. लट् । पुनाति ॥ 2. लोट् । पुनातु ॥ 3. लङ् । अपुनात् ॥ 4. विधि० । पुनीयात् ॥

5. लिट् । प्र० पुपाव । पुपुवतुः । पुपुवुः ॥ म० पुपविथ । पुपुवथुः । पुपुव ॥ उ० पुपाव–पुपव । पुपुविव । पुपुविम ॥ 6. लुट् । प्र० पविता । म० पवितासि । उ० पवितास्मि ॥ 7. लृट् । पविष्यति ॥ 8. आशी० । पूयात् । पूयास्ताम् ॥ पूयासुः ॥ 9. लुङ् । VII. प्र० अपावीत् । अपाविष्टाम् । अपाविषुः ॥ म० अपावीः । अपाविष्टम् । अपाविष्ट ॥ उ० अपाविषम् । अपाविष्व । अपाविष्म ॥ 10. लृङ् । अपविष्यत् ॥

आत्मनेपदे—1. लट् । पुनीते ॥ 2. लोट् । पुनीताम् ॥ 3. लङ् । प्र० अपुनीत । अपुनाताम् । अपुनत ॥ म० अपुनीथाः । अपुनाथाम् । अपुनीध्वम् ॥ उ० अपुनि । अपुनीवहि । अपुनीमहि ॥ 4. विधि० । प्र० पुनीत । पुनीयाताम् । पुनीरन् ॥ म० पुनीथाः । पुनीयाथाम् । पुनीध्वम् ॥ उ० पुनीय । पुनीवहि । पुनीमहि ॥

5. लिट् । प्र० पुपुवे । पुपुवाते । पुपुविरे ॥ म० पुपुविषे । पुपुवाथे । पुपुविध्वे--ढ्वे ॥ उ० पुपुवे । पुपुविवहे । पुपुविमहे ॥ 6. लुट् । प्र० पविता । म० पवितासे ॥ उ० पविताहे ॥ 7. लृट् । पविष्यते ॥ 8. आशी० । प्र० पविषीष्ट । पविषीयास्ताम् ! पविषीरन् ॥ म० पविषीष्ठाः । पविषीयास्थाम् । पविषीढ्वम्--ध्वम् ॥ उ० पविषीय । पविषीवहि । पविषीमहि ॥ 9. लुङ् । XI. प्र० अपविष्ट । अपविषाताम् । अपविषत ॥ म० अपविष्ठाः । अपविषाथाम् । अपविढ्वम्--ध्वम् ॥ उ० अपविषि । अपविष्वहि । अपविष्महि ॥ 10. लृङ् । अपविष्यत ॥

[३६४] लूञ् (लू) = छेदने । सक० । सेट् । उभ० । to cut off ; to divide. पूञ् (३६३) धातुवत् ॥

[३६५] मीञ् (मी) = हिंसायाम् । सक० । अनि० । उभ० । to kill ; to lessen ; to be lost. क्रीञ् (३६०) धातुवत् ॥ परस्मैपदे—5. लिट् । प्र० ममौ । मिम्यतुः । मिम्युः ॥ म० ममिथ–ममाथ । मिम्यथुः । मिम्य ॥ उ० ममौ । मिम्यिव । मिम्यिम ॥ 6. लुट् । माता । 7. लृट् । मास्यति ॥ 8. आशी० । मीयात् । मीयास्ताम् ॥ 9. लुङ् । IV. प्र० अमासीत् । अमासिष्टाम् । अमासिषुः ॥ म० अमासीः । अमासिष्टम् । अमासिष्ट ॥ उ० अमासिषम् । अमासिष्व । अमाासिष्म ॥ 10. लृङ् । अमास्यत् ॥

आत्मनेपदे—5. प्र० मिम्ये । मिम्याते । मिम्यिरे ॥ म० मिम्यिषे । मिम्याथे । मिम्यिध्वे--ढ्वे ॥ उ० मिम्ये । मिम्यिवहे । मिम्यिमहे ॥ 6. माता ॥ 7. लृट् । मास्यते ॥ 8. आशी० । मासीष्ट । मासीयास्ताम् । मासीरन् ॥ 9. लुङ् । X. प्र० अमास्त । अमासाताम् । अमासत । म० अमास्थाः । अमासाथाम् । अमाध्वम् ॥ उ० अमासि । अमास्वहि । अमास्महि ॥ 10. लृङ् । अमास्यत ॥

[३६६] स्तॄञ् (स्तॄ) = आच्छादने । सक० । सेट् । उभ० । to cover ; to spread.

परस्मैपदे—1. लट् । स्तृणाति ॥ 2. लोट् । स्तृणातु ॥ 3. लङ् । अस्तृणात् । 4. विधि० स्तृणीयात् ॥

5. लिट् । प्र० तस्तार । तस्तरतुः । तस्तरुः ॥ म० तस्तरिथ । तस्तरथुः । तस्तर ॥ उ० तस्तार--तस्तर । तस्तरिव । तस्तरिम ॥ 6. लुट् । स्तरिता—स्तरीता ॥ 7. लृट् । स्तरिष्यति--स्तरीष्यति ॥ 8. आशी० । स्तीर्यात् । स्तीर्यास्ताम् ॥ 9. लुङ् । VII. अस्तारीत् । अस्तारिष्टाम् । अस्तारिषुः । 10. लृङ् । अस्तरिष्यत्—अस्तरीष्यत् ॥

आत्मनेपदे—1. लट् । स्तृणीते ॥ 2. लोट् । स्तृणीताम् ॥ 3. लङ् । अस्तृणीत । अस्तृणाताम् । अस्तृणत ॥ 4. विधि० । स्तृणीत । स्तृणीयाताम् ॥

5. लिट् । प्र० तस्तरे । तस्तराते । तस्तरिरे ॥ म० तस्तरिषे । तस्तराथे । तस्तरिध्वे--ढ्वे ॥ उ० तस्तरे । तस्तरिवहे । तस्तरिमहे ॥ 6. लुट् । स्तरिता--स्तरीता ॥ 7. लृट् । स्तरिष्यते । स्तरीष्यते ॥ 8. आशी० । स्तरिषीष्ट--स्तीर्षीष्ट । 9. लुङ् ।XI. प्र० अस्तीर्ष्ट । अस्तीर्षाताम् । अस्तीर्षत ॥ पक्षे–अस्तरीष्ट । अस्तरीषाताम् । अस्तरीषत ॥ अथवा–अस्तरिष्ट । अस्तरिषाताम् । अस्तरिषत ॥ 10. लृङ् । अस्तरिष्यत--अस्तरीष्यत ॥

[३६६+] ग्रह (गृह्) = उपादाने । सक० । सेट् । उभ० । to take hold of ; to seize ; to understand.

परस्मैपदे—1. लट् । प्र० गृह्णाति । गृह्णीतः । गृह्णन्ति ॥ म० गृह्णासि । गृह्णीथः । गृह्णीथ ॥ उ० गृह्णामि । गृह्णीवः । गृह्णीमः ॥ 2. लोट् । प्र० गृह्णातु--गृह्णीतात् । गृह्णीताम् । गृह्णन्तु ॥ म० गृहाण--गृह्णीतात् । गृह्णीतम् । गृह्णीत ॥ उ० गृह्णानि ॥ 3. लङ् । प्र० अगृह्णात् । अगृह्णीताम् । अगृह्णन् ॥ म० अगृह्णाः ॥ उ० अगृह्णाम् ॥ 4. विधि० । गृह्णीयात् । गृह्णीयाताम् ॥

5. लिट् । प्र० जग्राह । जगृहतुः । जगृहुः ॥ म० जग्रहिथ । जगृहथुः । जगृह ॥ उ० जग्राह--जग्रह । जगृहिव । जगृहिम ॥ 6. लुट् । ग्रहीता ॥ 7. लृट् ।

ग्रहीष्यति॥ 8. आशी०। गृह्यात्। गृह्यास्ताम्॥ 9. लुङ्। VII. अग्रहीत्। अग्रहीष्टाम्। अग्रहीषुः॥ 10. लृङ्। अग्रहीष्यत्॥

आत्मनेपदे—1. लट्। प्र० गृह्णीते। गृह्णाते। गृह्णते॥ म० गृह्णीषे। गृह्णाथे। गृह्णीध्वे॥ उ० गृह्णे। गृह्णीवहे। गृह्णीमहे॥ 2. लोट्। प्र० गृह्णीताम्। गृह्णाताम्। गृह्णताम्॥ म० गृह्णीष्व। गृह्णाथाम्। गृह्णीध्वम्॥ उ० गृह्णै। गृह्णावहै। गृह्णामहै॥ 3. लङ्। प्र० अगृह्णीत। अगृह्णाताम्। अगृह्णत॥ म० अगृह्णीथाः। अगृह्णाथाम्। अगृह्णीध्वम्॥ उ० अगृह्णि। अगृह्णीवहि। अगृह्णीमहि॥ 4. विधि०। गृह्णीत। गृह्णीयात् गृह्णीरन्॥

5. लिट्। प्र० जगृहे। जगृहाते। जगृहिरे॥ म० जगृहिषे। जगृहाथे। जगृहिध्वे-ढ्वे॥ उ० जगृहे। जगृहिवहे। जगृहिमहे॥ 6. लुट्। ग्रहीता॥ 7. लृट्। ग्रहीष्यते॥ 8. आशी०। ग्रहीषीष्ट। ग्रहीषीयास्ताम्। 9. लुङ्। XI. प्र० अग्रहीष्ट अग्रहीषाताम्। अग्रहीषत॥ म० अग्रहीष्ठाः। अग्रहीषाथाम्। अग्रहीध्वम्--ढ्वम्॥ उ० अग्रहीषि। अग्रहीष्वहि। अग्रहीष्महि॥ 10. लृङ्। अग्रहीष्यत॥

इति क्र्यादयः॥ ९॥

अथचुरादयः ।

[३६७] चुर = स्तेये । सक० । सेट् । उभ० । to steal; to rob.

परस्मैपदे—1. लट् । प्र० चोरयति । चोरयतः । चोरयन्ति ॥ म० चोरयसि । चोरयथः । चोरयथ । उ० चोरयामि । चोरयावः । चोरयामः ॥ 2. प्र० चोरयतु—चोरयतात् । चोरयताम् । चोरयन्तु ॥ म० चोरय—चोरयतात् । चोरयतम् । चोरयत ॥ उ० चोरयाणि चोरयाव । चोरयाम ॥ 3. लङ् । प्र० अचोरयत् । अचोरयताम् । अचोरयन् ॥ म० अचोरयः । अचोरयतम् । अचारयत ॥ उ० अचोरयम् । अचोरयाव । अचोरयाम ॥ 4. विधि० । प्र० चोरयेत् । चोरयेताम् । चोरयेयुः ॥ म० चोरयेः । चोरयेतम् । चोरयेत ॥ उ० चोरयेयम् । चोरयेव । चोरयेम ॥

5. लिट् । प्र० चोरयांचकार । चोरयांचक्रतुः । चोरयांचक्रुः ॥ म० चोरयांचकर्थ । चोरयांचक्रथुः । चोरयांचक्र ॥ उ० चोरयांचकार—चोरयांचकर । चोरयांचकृव ।

चोरयांचक्रम ॥ पक्षे–प्र० चोरयामास । चोरयामासतुः । चोरयामासुः ॥ म० चोरयामासिथ । चोरयामासथुः । चोरयामास ॥ उ० चोरयामास । चोरयामासिव । चोरयामासिम ॥ अथवा–प्र० चोरयांबभूव ॥ म० चोरयांबभूविथ ॥ उ० चोरयांबभूव ॥ 6. लुट् । प्र० चोरयिता ॥ म० चोरयितासि ॥ उ० चोरयितास्मि ॥ 7. लृट् । प्र० चोरयिष्यति ॥ म० चोरयिष्यसि ॥ उ० चोरयिष्यामि ॥ 8. आशी० । प्र०चोर्यात् । चोर्यास्ताम् । चोर्यासुः ॥ म० चोर्याः । चोर्यास्तम् । चोर्यास्त ॥ उ० चोर्यासम् ॥ 9. लुङ् । III. प्र० अचूचुरत् । अचूचुरताम् । अचूचुरन् ॥ म० अचूचुरः । अचूचुरतम् । अचूचुरत ॥ उ० अचूचुरम् । अचूचुराव । अचूचुराम ॥ 10. लृङ् । अचोरयिष्यत् ॥

आत्मनेपदे—1. लट् । प्र० चोरयते । चोरयेते । चोरयन्ते ॥ 2. लोट् । प्र० चोरयताम् । चोरयेताम् । चोरयन्ताम् ॥ म० चोरयस्व । चोरयेथाम् । चोरयध्वम् ॥ उ० चोरयै । चोरयावहै । चोरयामहै ॥ 3. लङ् । प्र० अचोरयत । अचोरयेताम् । अचोरयन्त ॥ म० अचोरयथाः । अचोरयेथाम् । अचोरयध्वम् ॥ उ० अचोरये । अचोरयावहि । अचोरयामहि ॥ 4. विधि० । प्र० चोरयेत । चोरयेयाताम् । चोरयेरन् ॥ म० चोरयेथाः । चोरयेयाथाम् । चोरयेध्वम् ॥ उ० चोरयेय । चोरयेवहि । चोरयेमहि ॥

5. लिट् । प्र० चोरयांचक्रे । चोरयांचक्राते । चोरयांचक्रिरे ॥ म० चोरयांचकृषे । चोरयांचक्राथे । चोरयांचकृढ्वे ॥ उ० चोरयांचक्रे । चोरयांचकृवहे । चोरयांचकृमहे ॥ पक्षे–चोरयामास । इत्यादि ॥ अथवा–चोरयांबभूव । इत्यादि परस्मैपदवत् ॥ 6. लुट् । प्र० चोरयिता ॥ म० चोरयितासे । उ० चोरयिताहे ॥ 7. लृट् । चोरयिष्यते ॥ 8. आशी० । प्र० चोरयिषीष्ट । चोरयिषीयास्ताम् । चोरयिषीरन् ॥ म० चोरयिषीष्ठाः । चोरयिषीयास्थाम् । चोरयिषीध्वम्–ढ्वम् ॥ उ० चोरयिषीय । चोरयिषीवहि । चोरयिषीमहि ॥ 9. लुङ् । IX. प्र० अचूचुरत । अचूचुरेताम् । अचूचुरन्त ॥ म० अचूचुरथाः । अचूचुरेथाम् । अचूचुरध्वम् ॥ उ० अचूचुरे । अचूचुरावहि । अचूचुरामहि ॥ 10. लृङ् । अचोरयिष्यत ॥

[३६८] लक्ष = दर्शनाङ्कनयोः । सक० । सेट् । उभ० । to notice; to define; to regard.

1. लट् । लक्षयति–ते ॥ 2. लोट् । लक्षयतु–ताम् ॥ 3. लङ् । अलक्षयत्–त ॥ 4. विधि० । लक्षयेत्–त ॥

5. लिट् । लक्षयांचकार--चक्रे । इत्यादि ॥ 8. आशी० । लक्ष्यात् । लक्ष्यास्ताम् ॥ लक्षयिषीष्ट । लक्षयिषीयास्ताम् ॥ 9. लुङ् । IX. अललक्षत्--त ॥ 10. लृङ् । अलक्षयिष्यत्--त ॥

[३६९] पीड = अवगाहने । सक० । सेट् । उभ० ।
to afflict ; to press ; to oppose.

1. लट् । पीडयति--ते ॥ 5. लिट् । पीडयांचकार--चक्रे ॥ 6. लुट् । पीडयिता ॥ 7. लृट् । पीडयिष्यति--ते ॥ 8. आशी० । पीड्यात्--पीडयिषीष्ट ॥ 9. लुङ् । अपिपीडत्--त । अपीपिडत्--त ॥ 10. लृङ् । अपीडयिष्यत्--त ॥

[३७०] भक्ष = अदने । सक० । सेट् । उभ० ।
to eat.

1. लट् । भक्षयति--भक्षयते ॥ 5. लिट् । भक्षयांचकार--चक्रे ॥ 6. लुट् । भक्षयिता । 7. लृट् । भक्षयिष्यति--ते ॥ 8. आशी० । भक्ष्यात् । भक्ष्यास्ताम् । भक्षयिषीष्ट ॥ 9. लुङ् । अबभक्षत्--त ॥

[३७१] षान्त्व (सान्त्व्) = सामप्रयोगे । सक० । सेट् । उभ० ।
to appease ; to comfort ; to soothe ; to console.

1. लट् । सान्त्वयति--ते ॥ 5. लिट् । सान्त्वयांचकार--चक्रे ॥ 6. लुट् । सान्त्वयिता ॥ 7. लृट् । सान्त्वयिष्यति--ते ॥ 8. आशी० । सान्त्व्यात्--सान्त्वयिषीष्ट । 9. लुङ् । अससान्त्वत्--त ॥

[३७२] तड = आघाते । सक० । सेट् । उभ० ।
to beat.

1. लट् । ताडयति--ते ॥ 5. ताडयांचकार--चक्रे ॥ 6. लुट् । ताडयिता ॥ 7. लृट् । ताडयिष्यति--ते ॥ 8. आशी० । ताड्यात् । ताड्यास्ताम् । ताडयिषीष्ट ॥ 9. लुङ् । अतीतडत्--त ॥

[३७३] मडि (मण्ड्)= भूषायां हर्षे च । सक० । सेट् । उभ० । to adorn.

1. लट् । मण्डयति--ते ॥ 5. लिट् । मण्डयांचकार--चक्रे ॥ 6. लुट् । मण्डयिता ॥ 7. लृट् । मण्डयिष्यति--ते ॥ 8. आशी० । मण्ड्यात्--मण्डयिषीष्ट ॥ 9. लुङ् । अममण्डत्--त ॥

[३७४] क्षल = शौचकर्मणि । सक० । सेट् । उभ० । to wash; to cleanse.

1. लट् । क्षालयति--ते ॥ 5. लिट् । क्षालयांचकार--चक्रे । 6. लुट् । क्षालयिता ॥ 7. लृट् । क्षालयिष्यति--ते ॥ 8. आशी० । क्षाल्यात्--क्षालयिषीष्ट ॥ 9. लुङ् । अचिक्षलत्--त ॥

[३७५] तुल = उन्माने । सक० । सेट् । उभ० । to weigh; to examine.

1. लट् । तोलयति--ते ॥ 5. लिट् । तोलयांचकार--चक्रे ॥ 6. लुट् । तोलयिता ॥ 7. लृट् । तोलयिष्यति--

ते ॥ 8. आशी० । तोल्यात्--तोलयिषीष्ट ॥ 9. लुङ् । अतूतुलत्--त ॥ 10. लृङ् । अतोलयिष्यत्--त ॥

[३७६] पूज = पूजायाम् । सक० । सेट् । उभ० । to worship; to adore.

1. लट् । पूजयति--ते ॥ 5. लिट् । पूजयांचकार--चक्रे । 6. लुट् । पूजयिता ॥ 7. लृट् । पूजयिष्यति--ते । 8. आशी० । पूज्यात्--पूजयिषीष्ट ॥ 9. लुङ् । अपूपुजत्--त ॥

[३७७] कृत (कीर्त्) = संशब्दने । सक० । सेट् । उभ० । to name; to glorify.

1. लट् । कीर्तयति--ते ॥ 5. लिट् । कीर्तयांचकार--चक्रे ॥ 6. । कीर्तयिता ॥ 7. लृट् । कीर्तयिष्यति--ते । 8. आशी० । कीर्त्यात्--कीर्तयिषीष्ट ॥ 9. लुङ् । अचीकृतत्--त । अचिकीर्तत्--त ॥

[३७८] मत्रि (मन्त्र्) = गुप्तभाषणे । सक० । सेट् । आत्म० । to consult; to advise.

1. लट् । मन्त्रयते ॥ 5. लिट् । मन्त्रयांचक्रे । 6. लुट् । मन्त्रयिता । 7. लृट् । मन्त्रयिष्यते ॥ 8. आशी० । मन्त्रयिषीष्ट ॥ 9. लुङ् । अममन्त्रत ॥

[३७९] तर्ज = भर्त्सने । सक० । सेट् । आत्म० । to threaten; to menace.

1. लट् । तर्जयते ॥ 5. लिट् । तर्जयांचक्रे ।
7. लृट् । तर्जयिष्यते । 8. आशी० । तर्जयिषीष्ट ॥
9. लुङ् । अततर्जत ॥

[३८०] वञ्चु (वञ्च्) = प्रलंभने । सक० । सेट् । आत्म० ।
to cheat.

1. लट् । वञ्चयते ॥ 5. लिट् । वञ्चयांचक्रे ।
7. लृट् । वञ्चयिष्यते । 8. आशी० । वञ्चयिषीष्ट ॥
9. लुङ् । अववञ्चत ॥

[३८१] गर्ह = निन्दने । सक० । सेट् । उभ० । to censure;
to reproach.

1. लट् । गर्हयति--ते ॥ 5. लिट् । गर्हयांचकार--
चक्रे ॥ 6. लुट् । गर्हयिता ॥ 7. लृट् । गर्हयिष्यति--ते ॥
8. आशी० । गर्ह्यात्--गर्हयिषीष्ट ॥ 9. लुङ् । अजगर्हत्--त ॥

[३८२] कथ = वाक्यप्रबन्धे । सक० । सेट् । उभ० ।
to tell.

1. लट् । कथयति--ते ॥ 5. लिट् । कथयांचकार--चक्रे
6. लुट् । कथयिता ॥ 7. लृट् । कथयिष्यति--ते ॥ 8.
आशी० । कथ्यात्--कथयिषीष्ट ॥ 9. लुङ् । अचकथत्--त ।

[३८३] स्पृह = ईप्सायाम् । सक० । सेट् । उभ० । to desire; to envy.

1. लट् । स्पृहयति--ते ॥ 5. लिट् । स्पृहयांचकार--चक्रे ॥ 6. लुट् । स्पृहयिता ॥ 7. लृट् । स्पृहयिष्यति--ते ॥ 8. आशी० । स्पृह्यात्--स्पृहयिषीष्ट ॥ 9. लुङ् । अपस्पृहत्--त ॥

[३८४] रच = प्रतियत्ने । सक० । सेट् । उभ० । to arrange; to write; to make. कथ (३८२) धातुवत् । 9. लुङ् । अररचत्--त ॥

[३८५] गण = संख्याने । सक० । सेट् । उभ० । to count; to enumerate. कथ (३८२) धातुवत् ॥ 9. लुङ् । अजगणत्--त--अजीगणत्--त ॥

[३८६] सूच = पैशून्ये । सक० सेट् । उभ० । to ponit out; to betray; to indicate by gesture. पूज (३७६) धातुवत् ॥ 9. लुङ् । असुसूचत्--त ॥

[३८७] भूष = अलंकरणे । सक० । सेट् । उभ० । to adorn. पूज (३७६) धातुवत् ॥ 9. लुङ् अबूभूषत्--त ॥

[३८८] भाज = पृथक्करणे । सक० । सेट् ! उभ० । to divide.

1. लट् । भाजयति--ते ॥ 5. लिट् । भाजयांचकार--चक्रे ॥ 6. लुट् । भाजयिता ॥ 7. लृट् । भाजयिष्यति--ते ॥ 8. आशी० । भाज्यात्--भाजयिषीष्ट ॥ 9. लुङ् । अबभाजत्--त ॥

[३८९] वर्ण = वर्णक्रियाविस्तारगुणवचनेषु च । सक० । सेट् । उभ० । to paint; to explain; to extole.

1. लट् । वर्णयति--ते ॥ 5. लिट् । वर्णयांचकार--चक्रे ॥ 6. लुट् । वर्णयिता ॥ 7. लृट् । वर्णयिष्यति--ते ॥ 8. आशी० । वर्ण्यात्--वर्णयिषीष्ट ॥ 9. लुङ् । अववर्णत्--त ॥

[३९०] अर्थ उपयाच्ञायाम् । सक० । सेट् । आत्म० । to request; to sue. 1. लट् । अर्थयते । 5. लिट् । अर्थयांचक्रे ॥ 6. लुट् । अर्थयिता ॥ 7. लृट् । अर्थयिष्यते ॥ 8. आशी० । अर्थयिषीष्ट ॥ 9. लुङ् । आर्तथत ॥

[३९१] वर = ईप्सायाम् । सक० । सेट् । उभ० । to ask for; to get. 1. लट् । वरयति--ते ॥ 5. लिट् । वरयांचकार--चक्रे ॥ 6. लुट् । वरयिता ॥ 7. लृट् । वरयिष्यात--ते ॥ 8. आशी० । वर्यात्--वरयिषीष्ट ॥ 9. लुङ् । अववरत्--त ॥

[३९२] विडब = विडंबने । सक० । सेट् । उभ० । to mock; to deceive.

1. लट् । विडंबयति–ते ॥ 9. लुङ् । अविविडंबत्–त ।

[३९३] चित = संचेतने । सक० । सेट् । आत्म० । to perceive ; to be anxious.

1. लट् । चेतयते ॥ 9. लुङ् । अचीचितत ॥

[३९४] घुषिर् (घुष्) = अधिके शब्दे प्रतिज्ञाने च । सक० । सेट् । उभ० । to proclaim aloud ; to declare.

1. लट् । घोषयति–ते ॥ 5. लिट् । घोषयांच कार–चक्रे ॥ 9. लुङ् अजूघुषत्–त ॥

[३९५] पूरी – (पूर्) = आप्यायने । सक० । सेट् । उभ० । to fill ; to blow ; to cover.

1. लट् । पूरयति–ते ॥ 5. लिट् । पूरयांचकार–चक्रे ॥ 9. लुङ् । अपूपुरत्–त ॥

[३९६] दण्ड = दण्डनिपाते । दमने च । द्विक० । सेट् । उभ० । to fine ; to punish.

1. लट् । दण्डयति–ते ॥ 5. लिट् । दण्डयांचकार–चक्रे ॥ 6. लुट् । दण्डयिता ॥ 7. लृट् । दण्डयिष्यति–ते ॥ 9. लुङ् । अददण्डत्–त ॥

[३९७] छद = अपवारणे । सक० । सेट् । उभ० । to conceal.

1. लट् । छादयति--ते ॥ 5. लिट् । छादयांचकार--चक्रे ॥ 6. लुट् । छादयिता ॥ 7. लृट् । छादयिष्यति--ते ॥ 8. आशी० । छाद्यात्--छादयिषीष्ट ॥ 9. लुङ् । अचिच्छदत्--त ॥

[३९८] पार = कर्मसमाप्तौ । अक० । सेट् । उभ० । to finish;; to get over.

1. लट् । पारयति--ते ॥ 5. लिट् । पारयांचकार--चक्रे ॥ 7. लृट् । पारयिष्यति--ते ॥ 8. आशी० । पार्यात्--पारयिषीष्ट ॥ 9. लुङ् । अपपारत्--त ॥

[३९९] चिति (चिन्त्) = स्मृत्याम् । सक० । सेट् । उभ० । to think ; to consider.

1. लट् । चिन्तयति--ते ॥ 5. लिट् । चिन्तयांचकार--चक्रे ॥ 7. लृट् । चिन्तयिष्यति--ते ॥ 8. आशी० । चिन्त्यात्-चिन्तयिषीष्ट ॥ 9. लुङ् । अचिचिन्तत्--त ॥

[४००] मृग = अन्वेषणे । सक० । सेट् । आत्म० । to seek.

1. लट् । मृगयते ॥ 5. लिट् । मृगयांचक्रे ॥ 7. लृट् । मृगयिष्यते । 8. आशी० । मृगयिषीष्ट ॥ 9. लुङ् । अममृगत ॥

[४०१] धूञ् (धून्) = कंपने । सक० । सेट् । उभ० ॥ to shake.

1. लट् । धूनयति--ते ॥ 5. लिट् । धूनयांचकार-चक्रे ॥ 7. लृट् । धूनयिष्यति--ते ॥ 8. आशी० । धून्यात्--धूनयिषीष्ट ॥ 9. लुङ् । अदूधुनत्--त ॥

[४०२] षूद (सूद्) = क्षरणे हिंसायां च । सक० । सेट् । उभ० । to pour out; to strike.

1. लट् । सूदयति--ते ॥ 5. लिट् । सूदयांचकार-चक्रे ॥ 7. लृट् । सूदयिष्यति--ते ॥ 8. आशी० । सूद्यात्--सूदयिषीष्ट ॥ 9. लुङ् । असूषुदत्--त ॥

[४०३] लोकृ (लोक्) = भाषायां दीप्तौ च । सक० । सेट् । उभ० । to speak; to shine.

1. लोकयति--ते ॥ 5. लिट् । लोकयांचकार--चक्रे ॥ 7. लृट् । लोकयिष्यति--ते । 8. आशी० । लोक्यात्--लोकयिषीष्ट ॥ 9. लुङ् । अलुलोकत्--त ॥

[४०४] धृष = प्रसहने ॥ सक० । सेट् । उभ० । to injure; to violate.

1. लट् । धर्षयति--ते ॥ 5. लिट् । धर्षयांचकार--चक्रे ॥ 8. आशी० । धृष्यात्--धर्षयिषीष्ट ॥ 9. लुङ् । अदीधृषत्--त ॥ पक्षे–अदधर्षत्--त ॥

[४०५] प्री (प्रीण्) = तर्पणे कान्तौ च । सक० । सेट् । उभ० । to please.

1. लट् । प्रीणयति--ते ॥ 5. लिट् । प्रीणयांचकार--चक्रे ॥ 8. आशी० । प्रीण्यात्--प्रीणयिषीष्ट ॥ 9. लुङ् । अपिप्रीणत्--त ॥

इति चुरादयः ॥ १० ॥

शुभमस्तु ।

श्रीः

श्रीवरदराजाय नमः ॥

मध्यमधातुरूपावल्याम् ।

परिशिष्टम् ।

The Supplement.

[४०६] अञ्चु (अञ्च्) = पूजने गतौ याचने च । अचु इत्येके । भ्वादिः । सक० । सेट् । उभ० । पूजनार्थे परस्मैपदमेव । to worship; to go; to beg.

परस्मैपदे—1. लट् । अञ्चति ॥ 2. लोट् । अञ्चतु ॥ 3. लङ् । आञ्चत् ॥ 4. विधि० । अञ्चेत् ॥

5. लिट् । प्र० आनञ्च ॥ म० आनञ्चिथ ॥ उ० आनञ्च ॥ 8. आशी० । अञ्च्यात् । अञ्च्यास्ताम् ॥ गत्यर्थे नलोपः । अच्यात् । अच्यास्ताम् ॥ 9. लुङ् । VII. आञ्चीत् ॥

आत्मनेपदे—1. लट् । अञ्चते ॥ 5. लिट् । आनञ्चे । आनञ्चाते । आनञ्चिरे ॥ 9. लुङ् । XI. प्र० आञ्चिष्ट ॥ म० आञ्चिध्वम्--ढ्वम् ॥

[४०७] ईर्ष्य = ईर्ष्यायाम् । भ्वादिः । अक० । सेट् । पर० । to envy.

1. लट् । ईर्ष्यति ॥ 2. लोट् । ईर्ष्यतु ॥ 3. लङ् । ऐर्ष्यत् ॥ 4. विधि० । ईर्ष्येत् ॥

5. लिट् । ईर्ष्याञ्चकार--ईर्ष्यांबभूव--ईर्ष्यामास ॥ 8. आशी० । ईर्ष्यात् । ईर्ष्यास्ताम् ॥ 9. लुङ् । VII. ऐर्ष्यीत् । ऐर्ष्यिष्टाम् । ऐर्ष्यिषुः ॥ 10. लृङ् । ऐर्ष्यिष्यत् ॥

[४०८] उक्ष = सेचने । भ्वादिः । सक० । सेट् । पर० । to sprinkle; to wet.

1. लट् । उक्षति ॥ 2. लोट् । उक्षतु ॥ 3. लङ् । औक्षत् ॥ 4. विधि० । उक्षेत् ॥

5. लिट् । उक्षांचकार इत्यादि ॥ 8. आशी० । उक्ष्यात् । उक्ष्यास्ताम् ॥ 9. लुङ् । VII. औक्षीत् । औक्षिष्टाम् ॥ 10. लृङ् । औक्षिष्यत् ॥

[४०९] उच्छि (उञ्छ्) = उञ्छे । भ्वादि० । सक० । सेट् । पर० । to glean. उक्ष (४०८) धातुवत् ॥

1. लट् । उञ्च्छति ॥ 2. लोट् । उञ्च्छतु ॥ 3. लङ् । औञ्च्छत् ॥ 4. विधि० । उञ्च्छेत् ॥

5. लिट् । उञ्च्छांचकार ॥ 8. आशी० । उञ्च्छ्यात् । उञ्च्छ्यास्ताम् ॥

[४१०] कमु (कम्) = कान्तौ । भ्वादिः । सक० । सेट् । आत्म० । to desire.

1. लट् । कामयते ॥ 2. लोट् । कामयताम् ॥ 3. लङ् । अकामयत ॥ 4. विधि० । कामयेत ॥
